
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

चित्रदीप०
१

श्रीगणेशाय नमः॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी १ चिकीर्षितस्य ग्रंथस्य निःप्रत्यूहपरिपूरणाय परमात्मनो इति पदेन इष्टदेवतातत्वानुसंधानलक्षणं मंगलमाचरन्नस्य। ग्रंथस्य वेदांतप्रकरणत्वात् तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधाय अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यत इति न्यायमनुसरन् परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टांतं प्रतिजानीते यथेति॥

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं १ यथा
धौतो घट्टितश्च लांछितो रंजितः पटः चिदंतर्यामिसूत्रात्मा विराडात्मा तथेर्यते २

॥ चित्रपटे यथा वक्ष्यमाणानां अवस्थानां चतुष्टयं तथा परमात्मन्यपि वक्ष्यमाणमवस्थाचतुष्टयं ज्ञेयमिति १ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरप्यवस्थाचतुष्टयं क्रमेणोद्दिशति यथेति। धौतो घट्टितो लांछितो रंजित इत्येवंप्रकाराश्चतस्रोऽवस्था यथा चित्रपट उपलभ्यंते तथा परमात्मन्यपि चिदंतर्यामी सूत्रात्मा विराडात्मेत्यवस्थाचतुष्टयं बोद्धव्यमित्यर्थः २

१

दृष्टांतसिद्धानामवस्थानां स्वरूपं क्रमेण स्फुटयति स्वत इति अत्र आस्ववस्थासु स्वतो द्रव्यांतरसंबंधं विना
शुभ्रो धौत इत्युच्यते ॥ अन्नेन लिप्तो घट्टितः मषीमयैराकारैर्युक्तो लांछितः यथायोग्यवर्णैः पूरितो रंजितः स्या
त् ३ दार्ष्टांतिके तान्स्फुटयति स्वत इति परः परमात्मा स्वतः मायातत्कार्यरहितश्चिदित्युच्यते मायायोगा

स्वतः शुभ्रोऽत्र धौतः स्यात् घट्टितोऽन्नविलेपनात् मष्याकारैर्लांछितः स्यात् रंजितो वर्णपूरणात् ३
स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः ४ ब्रह्माद्याः
स्तंबपर्यंताः प्राणिनोऽत्र जडा अपि उत्तमाधमभावेन वर्तंते पटचित्रवत् ५

ऽऽदंतर्यामी अपंचीकृतभू
तकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगाद्विराडिति ४
ननु परमात्मनः चित्रपटस्थानीयत्वे तदाश्रितानि चित्राणि वक्तव्यानीत्यत आह ब्रह्माद्या इति ॥ अत्र परमात्मन्यु
त्तमाधमभावेन वर्तमानं ब्रह्मादिस्तंबपर्यंतं चेतनात्मकं गिरिनद्यादि जडजातं च चित्रस्थानीयमित्यर्थः ५

१ + णामेवनानावर्णार्पितावस्त्रविशेषालिख्यंतेनेत्य
शीताद्यनिवारकत्वाद्वस्त्राभासाएव॥६॥

चित्रदीप० २ ब्रह्मादिजगतश्चेतन नत्वेकारणंवक्तुंदृष्टांतमाह चित्रेति यथाचित्रेलिखितानांमनुष्यादिशरीराणांपृथगिति कमाह पृथ
गिति एवंपरमात्मन्यारोपितानांदेवादीनांशरीरिणामेवजीवनामान [illegible] श्चिदाभासाः प्रत्येकंकल्प्यंतेन पर्वतादीनांतेषांकल्प्यनेकार

चित्रार्पितमनुष्याणांवस्त्राभासाः पृथक्पृथक्॥ चित्राधारेणवस्त्रेणसंदृशाइवकल्पिताः ६ पृथक्पृ
थक्चिदाभासाश्चैतन्याध्यस्तदेहिनां कल्प्यंतेजीवनामानोवहुधासंसरंत्यमी ७ वस्त्राभासस्थि
तान्वर्णान्यद्वदाधारवस्त्रगान् वदंत्यज्ञास्तथाजीवसंसारंचिद्गतंविदुः ८ ३

॥ कमाह वहुधेति अ
स्मा मीजीवाः देवतिर्यङ्मनुष्यादिशरीरस्थाःवहुधासंसरंति नपरमात्मातस्यनिर्विकारत्वादित्यभिप्रायः ७ २
ननुसर्वेवादिनोलौकिकाश्चात्मनएवसंसारइतिवदंति तत्रकिंकारणमित्याशंक्य अज्ञानमेवकारणमिति
सदृष्टांतमाह वस्त्राभासेति ८

गिरिनद्यादीनां तु चिदाभासकल्पनाभावं दृष्टांतपुरःसरमाह चित्रस्थेति प्रयोजनाभावादिति भावः ९ एवमात्म
न्यारोपितस्य संसारस्याज्ञाननिवर्त्यत्वसिद्धये तन्मूलभूतामविद्यामाह संसार इति १० केयं विद्या तल्लाभोपाय
कश्च इत्याकांक्षायां विद्यास्वरूपं तल्लाभोपायं च दर्शयति आत्माभासस्येति चिदाभासस्येत्यर्थः ११ विचाराल्लभ

चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा नहि ९ संसारः परमार्थोयं संल
ग्नः स्वात्मवस्तुनि इति भ्रांतिरविद्यास्याद्विद्ययैषा निवर्त्तते १० आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः इति
त्व बोधो भवेद्विद्या लभ्यतेसौ विचारणात् ११ सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः जीवभावजगद्भाववाधे स्वात्मैव शि
ष्यते १२

॥ते विद्यस्फलं॥ कस्य विचाराल्लभ्यते विद्येत्याशंक्याह [illegible] सदेति ननु परमात्मविचार्यतां मोक्षावस्थायां
फलरूपेण अवस्थानाज्जीवजगतोर्विचारः क्वोपयुज्यत इत्याशंक्य तयोरपबाधनेन परमात्मावशेषणे उपयुज्यत इत्या

चित्रदी० प०
७

ननु विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं विपक्षेदं डं चाह नाप्रतीतिरिति सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावात्तत्त्वज्ञानं विना पि मुक्तिः स्यादित्यर्थः ॥१३॥ स्यात्तैव शिष्यते इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्ष्यते न तदतिरिक्तजगद्विस्मृतिर्जीवन्मुक्तभाव

नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः १३ परमात्माव शेषोपि तत्सत्यत्वविनिश्चयः न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत् १४ परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा तत्रापरोक्षविद्याप्तौ विचारोयं समाप्यते १५ अस्ति ब्रह्मेति चेद्वेद परोक्षं ज्ञानमेव तत् अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते १६

प्रसंगादित्याह परमात्मेति १४ सदा विचारयेदित्युक्तत्वादेहपातपर्यंतं विचारप्रसक्तौ तस्यांतस्यावधिमाह परोक्षा चापरोक्षेति १५ विचारजन्याया विद्यायाः परोक्षत्वापरोक्षत्वभेदेन द्वैधेत्युक्तं तयोरु

त्म

एवंविधोसाक्षात्कारासाधारणंकारणमात्मतत्वविवेचनं प्रतिजानीते तत्साक्षात्कारेति येनसाक्षात्कारेणपुमान् सद्यएवविमुच्यते तत्साक्षात्कारसिध्यर्थमिति पूर्वेणान्वय १७ चिदात्मनः पारमार्थिकमेकत्वं निश्चेतुंव्यवहारदशायांप्रतीयमानंचैतन्यभेदमुद्दिशति कूटस्थइति एकस्याश्चितेश्चातुर्विध्येदृष्टांतमाह ॥ घटाकाशेति

तत्साक्षात्कारसिध्यर्थमात्मतत्वंविविच्यते येनायंसर्वसंसारात्सद्यएवविमुच्यते १७ कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा घटाकाशमहाकाशौजलाकाशाभ्रखेयथा १८ घटावछिन्नखेनीरंयत्तत्रप्रतिबिंबितः साभ्रनक्षत्रआकाशोजलाकाशउदीर्यते १९ ॥श्री॥

१८ घटावछिन्नस्यघटाकाशस्यतदनवछिन्नस्यचमहाकाशस्यप्रसिद्धत्वात्तौविहायाप्रसिद्धंजलाकाशंव्युत्पादयति घटावछिन्नेति घटावछिन्नेआकाशेयदुदकमस्तितत्रजलेप्रतिबिंबितोभ्रनक्षत्रसहितआकाशोजलाकाशइत्युच्यते १९

चित्रदी॰ १० अभ्राकाशं प्रसादयति महाकाशस्येति तत्र मेघमंडलेयज्जलं तस्मिन्नित्यर्थः २० ननु मेघजलस्य प्रतीयमान
४ त्वाभावेन तत्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह मेघांशेति मेघस्थस्य जलस्य प्रत्यक्षेणानुपलंभेपि वृष्टि

महाकाशस्य मध्ये यन्मेघमंडलमीक्ष्यते प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः २० मेघांश
रूपमुदकं तुषाराकारसंस्थितं तत्र खप्रतिबिंबोयं नीरत्वादनुमीयते २१ ॥श्रु॥ ॥

लक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयते उक्तदलैनैव लिंगेन विमतं जलमा ४
काशप्रतिबिंबवद्भवितुमर्हति जलत्वात् घटगतजलवदित्यनुमानेन मेघांशरूपे जले प्याकाशप्रतिबिंबसद्भावो
वगम्यत इत्यर्थः २१॥

7

एवंदृष्टांतभूतमाकाशचतुष्टयंव्युत्पाद्यदार्ष्टांतिकेप्रथमोद्दिष्टंकूटस्थंव्युत्पादयति अधिष्ठानेति॥ पंचीकृतापंचीकृतभूतकार्यत्वेनस्थूलसूक्ष्मरूपस्यदेहद्वयस्याविद्याकल्पितस्याधारतयावर्तमानत्वेनताभ्यामवच्छिन्नआत्माकूटस्थइत्युच्यते तत्रकूटस्थशब्दप्रवृत्तौनिमित्तमाह कूटवदिति २२ एवंकूटस्थंव्युत्पाद्य

अधिष्ठानतयादेहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेणस्थितःकूटस्थउच्यते २२ कूटस्थे
कल्पिताबुद्धिस्तत्रचित्प्रतिबिंबकः प्राणानांधारणाज्जीवः संसारेणप्रयुज्यते २३

जीवस्यकूटस्थेकल्पितबुद्धिप्रतिबिंबत्वेनतत्सक्षपातित्वात्तंव्युत्पादयति॥कूटस्थइति॥तस्यजीवशब्दाभिधेयत्वेनिमित्तमाह॥प्राणानामिति॥कूटस्थातिरिक्तजीवकल्पनप्रयोजनमित्याशंक्याविकारिणःकूटस्थस्यसंसारासंभवात्तन्निर्वाहार्थंसोंगीकर्तव्यइत्याह॥संसारेणेति २३ ॥श्री॥ ॥श्री॥ ॥

चित्रदीप० ५

ननु जीवातिरिक्तः कूटस्थोऽस्ति चेत्तर्हि किमिति न प्रतिभासत इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टांतमाह जले
ति ननु केन तिरोधानेन कदापि शास्त्रप्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्नैवमित्याह॥
सोऽन्योन्याध्यास इति उच्यते भाष्यादिषु विशेषः २४ नन्वयमेवाध्यासश्चेदस्य कारणरूपाविद्यावक्तव्येत्या

जलव्योम्ना घटाकाशो यथा सर्वैस्तिरोहितः तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते २४ अयं
जीवो न कूटस्थं विविनक्ति कदाचन अनादिरविवेकोऽयं मूलाविद्येति गम्यतां २५ विक्षेपावृतिरू
पाभ्यां द्विधाविद्या व्यवस्थिता न भाति नास्ति कूटस्थ इत्यापादनमावृतिः २६

॥ जीवकूटस्थयोः
संसारदशायां भेदाप्रतीतिरविद्येत्याह अयमिति २५ पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वस्य स्पष्टीकरणा
याविद्यां विभजते विक्षेपेति विक्षेपहेतुत्वेन अभ्यर्हितत्वादावृतिं प्रथमं लक्षयति न भातीति कूटस्थो न ५
भाति न प्रकाशते नास्ति चेति व्यवहारहेतुः आवरणमित्यर्थः २६ ॥श्रीरामाय नमः॥ ॥

9

नच विद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्याह अज्ञानीति विदुषा कूटस्थं किं
जानासीति पृष्टो ऽज्ञानी तं न जानामीत्यज्ञानमनुभूय वक्ति ॥ अयमविद्यानुभवः न केवलमज्ञानानुभवमेव

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रवुध्यते न भाति नास्ति कूटस्थ इति बुद्धो वदत्यपि ७ ॥श्री॥

वक्ति ॥ अपि तु नास्ति न भाति कूटस्थ इति ॥ कूटस्थाभावाभाने चानुभूय वदति अयमावरणानुभवः अतउ
भयत्रानुभवः प्रमाणमिति भावः २७

ननु भवन्मते आत्मनः स्वप्रकाशत्वात्तस्मिन्नविद्याया नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः संबं
धानुपपत्तेरविद्याभावे च तत्कृतमावरणं दुर्निरूपं स्यात्तदभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षेपा

स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ २८

भावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञानवैयर्थ्यं॥ ततस्तत्प्रतिपादकं शास्त्रं अप्रमाणं स्यादित्याशंक्यैत
त्सर्वं पूर्वोक्तानुभवबाधितमित्याह स्वप्रकाश इति न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः २८

नन्वनुभवस्योक्ततर्कविरोधेनाभासत्वान्नतेन तत्त्वनिश्चय इत्याशंक्यानुभवप्रामाण्यानभ्युपगमे केवलतर्कस्य।
निश्चायकत्वस्य स्वेनैवाभ्युपगतत्वान्न तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह स्वानुभूताविति २९ नन्व

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात् २९ बु
ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यतां ३०

नुभवस्तत्त्वनिश्चायक एव तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोऽप्यभ्युपेतव्य इत्याशंक्यानू
यतर्क्यनुभवानुसारेणैव तर्को वर्णनीयो न तद्विरोधेनेत्याह बुध्यारोहायेति ३० ॥श्रीरामायनमः

चित्रदी० प० कोसावनुभवो यदनुसारेण तर्केविर्णनाय इत्याशंकायां पूर्वोक्तमविद्यादिगोचरं अनुभवं स्मारयति स्वानुभू

७ तिरिति ॥ फलितमाह अतइति ३१ तमेव तर्कमभिनीय दर्शयति तद्बुद्धेति अविद्यावरणसाधकश्चेतन्म

स्वानुभूतिरविद्यायामावृतौ च प्रदर्शिता अतः कूटस्थचैतन्यमविरोधीति तर्क्यतां ३१ तद्बु

द्धिरोधिकैनेयमावृतिर्यदनुभूयतां विवेकस्तु विरोधस्यास्तत्वज्ञानिनिरूप्यतां ३२ ॥श्री॥

सैव न द्विरोधित्वे ऽविद्यामनो निरेव तस्यादिति भावः तर्हि विद्याभ्याः को विरोधीत्यत आह विवेकउपनिषद्विचा ७

रजन्यं तोनं विवेकस्याविद्याविरोधित्वं द्वद्दृष्टमित्यत आह ॥ तत्वज्ञानिनीति ३२ ॥श्रीरामचन्द्रायनमः॥

एवमविद्यावरणे दर्शयित्वा विक्षेपाध्यासमाह अविद्येति पूर्वोक्ताविद्यावरणवति कूटस्थे मस्तागात्मन्या
रोपितस्थूलसूक्ष्मशरीरसहितश्चिदाभासो विक्षेपाध्यास इत्यर्थः ३३ अस्य विक्षेपस्याध्यासत्वसिद्धये
शुक्तिरजताध्याससाम्यं दर्शयति इदमंशस्येति॥ शुक्तिकायां स्थितपुरोदेशादिसंबंधित्वमबाध्यत्वं च

अविद्यावृतिकूटस्थे देहद्वययुता चितिः शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि ३३ इद
मंशस्य सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽनुगं ३४ नीलपृ
ष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं असंगानंदताद्येवं कूटस्थेऽपि तिरोहितं ३५

॥यथारोपि
ते रजतेऽवभासते एवं स्वयंत्ववस्तुत्वं च कूटस्थनिष्ठमारोपिते चिदाभासेऽवभासत इत्यर्थः ३४ एवं सामा
न्यांशप्रतीतिमुभयत्र प्रदर्श्य विशेषांशाप्रतीतिसाम्यं दर्शयति नीलेति ३५ ॥श्रीरामायनमः॥ ॥

साम्यांतरं दर्शयति आरोपितस्येति॥ दृष्टांते शुक्तिस्थले आरोपितपदार्थस्य रूप्यनाम रूप्यमिति नाम यथा एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्य पूर्वोक्तस्याहमिति नामेत्यर्थः ३६ ननु दृष्टांते पुरोवर्तिनि शुक्तिकाशक

आरोपितस्य दृष्टांते रूप्यनाम यथा तथा॥ कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ३६
इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते तथा स्वयं स्वतः पश्यन्नहमित्यभिमन्यते ३७

ले इंद्रियसन्निकर्षे जाते सति रूप्यमिदमिति तदतिरिक्तरजताभिमान उपपद्यते नैवं दार्ष्टांतिके आत्मातिरिक्तवस्त्वभिमान इत्याशंक्य अत्रापि स्वप्रकाशतया चिदात्मन्यवभासमाने तदतिरिक्तोऽहमित्यभिमानः उपलभ्यते। तेन वैषम्यमित्यभिप्रायेणाह॥ इदमंशमिति ३७

ननु स्वयमहंशब्दयोरेकार्थत्वात्कथं दृष्टांतदार्ष्टांतिकयोः साम्यमित्याशंक्येदंरूप्यशब्दार्थयोः स्वयमहंशब्दा
र्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यान्नैवमित्याह इदंत्वरूप्यतेति ३८ स्वयंशब्दार्थस्य सामा
न्यरूपत्वं स्पष्टं कर्तुं लौकिकप्रयोगं तावद्दर्शयति ॥ देवदत्त इति ३९ भवत्वेवं प्रयोगः लोके कथमेतावता

इदंत्वरूप्यते भिन्ने स्वत्वाहंते तथेष्यतां सामान्यं च विशेषश्च त्युभयत्रापि गम्यते ३८ देवदत्तः
स्वयं गच्छेत्त्वं वा पश्य स्वयं तथा अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ३९ इदं रूप्यमिदं
वस्त्रमिति पद्वदिदं तथा आसौ त्वमहमित्येषु स्वयमित्यभिमन्यते ४०

॥ स्वयंशब्दार्थस्य सामान्यरूपत्व
मित्याशंक्य इदंशब्दार्थवदित्याह ॥ इदंरूप्यमिति यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सा
मान्यरूपत्वं तथा असौ त्वमहमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्यरूपत्वमवगम्यत इत्यर्थः ४०

चित्रदीप० ६

भवतु स्वयमहंशब्दयोर्लोके भेद एतावता कूटस्थात्मनि किमायातमिति पृच्छति॥ अहंत्वादिति सामान्यरूपः स्वयं
शब्दार्थ एव कूटस्थ इतीदमायातमित्याह स्वयंशब्दार्थ इति ४१ ननु स्वत्वरूपो धर्मोऽन्यत्वं वारयति न कूटस्थ

अहंत्वाद्वियतां स्वत्वं कूटस्थे तेन किं तव॥ स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवेत् ४१ अन्यत्व
वारकं स्व[illegible]त्वमिति चेदन्यवारणं कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत् ४२ ॥श्री॥

त्वं बोधयतीति शंकते अन्यत्ववारकमिति स्वयंशब्दार्थस्य कूटस्थस्यैवात्मत्वात् स्वत्वेन अन्यवारणमिष्टमेवे
ति परिहरति अन्यवारणं कूटस्थस्येति ४२ वासुदेवं परित्यज्य योऽन्यदेवमुपासते तृषितो जाह्नवीतीरे कूपं
खनति दुर्मति १ ६

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्गवाश्वादिशब्दयोरिवएकार्थत्वाभावात्कथं स्वयंशब्दार्थस्य
कूटस्थस्यात्म[illegible]त्वमित्याशंक्य हस्तकरादिशब्दवदेकार्थत्वोपपत्तेर्मैवमिति परिहरति स्वयमात्मेतीति
पर्यायत्वे सहप्रयोगाभावहेतुमाह नेन लोक इति ॥ फलितमाह ॥ अतः स्वत्वमिति ४३ ननु घटादिष्वचे

स्वयमात्मेति पर्यायौ तेन लोके तयोः सह ॥ प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकं ४३ घटः
स्वयं न जानातीत्येवं स्वत्वं घटादिषु ॥ अचेतनेषु दृष्टं चेद्दृश्यतामात्मसात्त्वतः ४४ ॥ श्री ॥

तनेषु अपि स्वयंशब्दस्य प्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शंकते ॥ घट इति घटादिष्वपि स्फु
रणरूपेणात्मचैतन्यस्य सत्त्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह दृश्यतामिति ४४

ननुयद्यादिष्वपिआत्मचैतन्यस्यसत्वेचेतनाचेतनविभागोनिर्निमित्तकःस्यादित्याशंक्यचेतनाचेतनविभाग
स्यचिदाभाससत्वासत्वलक्षणकारणसद्भावान्नैवमितिपरिहरति चेतनेति॥ ४५॥ चेतनाचेतनविभागस्य
चिदाभाससत्वासत्वप्रयुक्तत्वाभ्युपगमेऽचेतनेष्वात्मसत्वाभ्युपगमोनिष्प्रयोजनःस्यादित्याशंक्यचेतनाचे

चेतनाचेतनभिदाकूटस्थात्मकृतानहि॥ किंतुबुद्धिकृताभासकृतैवेत्यवगम्यतां ४५ यथा
चेतनआभासःकूटस्थेभ्रांतिकल्पितः अचेतनोघटादिश्चतथातत्रैवकल्पितः ४६

तनविभागहेतुत्वेनकूटस्थस्यानभ्युपगमात्वेप्यचेतनकल्पनाधिष्ठानत्वेनकूटस्थोभ्युपगंतव्यइत्यभिप्रायेण १०
घटादेरतत्रकल्पितत्वेसदृष्टांतमाहयथाचेतनइति ४६ ॥श्रीरामायनमः॥ ॥श्री॥ ॥

स्वत्वात्मत्वयोरेकत्वेऽतिप्रसंगं शंकते नन्वेवं तेऽपीति त्वमहमादिषु सर्वत्रानुगतस्य स्वत्वस्यैव सर्वत्रानुग
तयोस्तन्नेदं तयोरप्यात्मस्वरूपता किं न स्यादिति भावः ४७ नन्वेवं यो नैरात्म्यत्वाधिकवृत्तित्वादात्मत्वं न सं यो
भवतीत्याह तेऽप्यात्मत्वेऽपीति नन्वेवं तेस्वत्वमिव यद्यपि त्वमहमादिष्वनुगतं तथापि तेष्वनुवर्त्तमाने आत्

त्वं नेदं तेऽपि स्वत्वमिव त्वमहमादिषु सर्वत्रानुगतेते न तयोरप्यात्मतेति चेति चेत् ४७ तेऽप्यात्मत्वे
ष्वनुगतेऽत नेदं ते ततस्तयोः आत्मत्वं नैव संभाव्यं सम्यक्त्वादेर्यथा तथा ४८ ॥श्रीरामायनम

त्मत्वेष्वनुगते तदात्मत्वमिदमात्मत्वमित्यादिव्यवहारसंभवादतस्तयोरात्मत्वाधिकवृत्तित्वादात्मत्वरूपता न
संभाव्यते तत्र दृष्टान्तः सम्यक्त्वादेरिति आत्मत्वं सम्यगात्मत्वमसम्यगिति व्यवहारवशादात्मत्वेष्वनुवर्त्त
मानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः ४८

चित्रदी प० एवं प्रासंगिकं परिसमाप्य फलितप्रदर्शनाय लोकव्यवहारसिद्धमर्थमनुवदति तन्नेदं ते इति त्वंताप्रतियोगि
११ त्वमिदंतायास्तद्विदमिति स्वत्वप्रतियोगित्वमन्यत्वस्य स्वयमन्य इति॥ त्वंताप्रतियोगित्वमहंतायाः स्वमह

नत्वेदं ते स्वत्वान्यत्वे त्वंताहंते परस्परं प्रतिद्वंद्वितया लोके प्रसिद्धे नास्ति संशयः ४९ अन्यता
याः प्रतिद्वंद्वी स्वयं कूटस्थ इष्यतां त्वंतायाः प्रतियोग्येषोहमित्यात्मनि कल्पितः ५०

मिति लोके प्रतिद्वंद्वित्वेन प्रयोगदर्शनात्प्रसिद्धमिति भावः ४९ भवत्वेवं लोके प्रकृते किमायातमित्यत आह॥ ॐ ११
अन्यताया इति॥ अन्यत्वप्रतियोगी स्वयंशब्दार्थः त्वंताप्रतियोगी अहंशब्दार्थश्चिदाभासः कूटस्थे कल्पित इ प्र

कूटस्थः

ननूक्तप्रकारेण जीवकूटस्थयोर्भेदे सत्यपि सर्वे इत्थं किमिति न जानंतीत्याशंक्याह ॥ अहंत्वेति बुद्धिसाक्षिणः कूटस्थस्य बुध्या प्रत्यक्षीकर्तुमशक्यत्वात्स्वयमहमिति प्रतिभासमानयोर्जीवकूटस्थयोरन्योन्यैकत्वं प्रतिपन्ना इत्यर्थः ५१

अहंत्वस्वत्वयोर्भेदे रूपे नेदं तयोरिव ॥ स्पष्टेऽपि मोहमापन्ना एकत्वं प्रतिपेदिरे ५१ तादात्म्याध्यास एवात्र पूर्वोक्ताविद्यया कृतः अविद्यायां निवृत्तायां तत्कार्यं विनिवर्त्तते ५२

नन्वस्य जीवकूटस्थयोरेकत्वभ्रमस्य किं कारणमित्यपेक्षायामाह तादात्म्येति अत्रास्मिन्ग्रंथे ऽनादिरविवेकोयमित्यत्रोक्ताविद्ययेत्यर्थः यतो विद्याकार्यत्वमस्यातोऽविद्यानिवर्त्तकत्वाने नैव तन्निवृत्तिरित्याह अविद्या

चित्रदी० प०
१२

नन्वध्यासस्याविद्याकार्यत्वात्तन्निवृत्त्यानिवृत्तिरित्येतदनुपपन्नं॥ ब्रह्मात्मैकत्वविद्यायां उत्पन्नायामप्यविद्याकार्यस्य देहादेरुपलभ्यमानत्वादित्यत आह॥ अविद्यावृत्तीति॥ अविद्यैककारणकयोरावृतितादात्म्ययोर्विद्ययैव विनिवृत्तिः॥ प्रारब्धकर्मसहिताविद्याजन्यस्य तु विक्षेपरूपस्य कर्मावसानपर्यंतमवस्थानमित्यविरोध इति भावः

अविद्यावृतितादात्म्ये विद्ययैव विनश्यतः विक्षेपस्य स्वरूपं तु प्रारब्धक्षयमीक्षते ५३ उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत् ५४ ॥श्री॥

५३ ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्सद्भावमात्रेण उपादाने विनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्य शास्त्रांतरसिद्धं दृष्टांतेन तदनुवृत्तिं संभावयति उपादान इति ५४ ॥श्री॥ ॥श्री॥ ॥ १२

23

ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं तेन चिरकालमित्याशंक्याह तंतूनामिति संसारस्यानादिकालमारभ्य अनुवर्तमानसंस्कारवशेन चक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुध्यत इति भावः ५५ ननु तार्किकैर्यथायुक्तमभिहितं तन्न दृष्टवतापीति आशंक्य स्वोक्तौ ततो वैषम्यं दर्शयति ॥ विनेति ॥ क्षोदक्षमं विचारसहं

तंतूनां दिनसंख्यानां तैस्तादृक्लक्षणं ईरितः भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इतीष्यतां ५५
विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते श्रुतियुक्त्यनुभूतिभ्यो वदतां किंनु दुःशकं ५६

मानं विना प्रमाणमंतरेणेत्यर्थः तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति श्रुतिश्चक्रभ्रमादिदृष्टांतो युक्तिरनुभूतिर्विद्वदनुभवस्तेभ्यः प्रमाणेभ्यः किं वक्तुमशक्यमित्यभिप्रायः ५६ ॥श्रीरामाय नमः॥

चित्रदी०प० प्रकृतमनुसरति आस्तामिति स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वंभ्रांत्यासिद्धं ५७ ननुकूटस्थजीवयो
१३ रेकत्वंभ्रांतिसिद्धंचेदिदंभ्रांतिसिद्धमितिकेपिकुतोनजानंतीत्याशंक्यश्रुतितात्पर्यपर्यालोचनमूर्खत्वादि।

आस्तांदुस्तार्किकैःसार्धंविवादःप्रकृतंब्रुवे स्वाहंमोः सिद्धमेकत्वंकूटस्थपरिणामिनोः ५७ भ्रा
भ्रांतेपंडितंमन्याः सर्वेलौकिकतैर्थिकाः॥ अनादृत्यश्रुतिंमौर्ख्यात्केवलांयुक्तिमाश्रिताः ५८
पूर्वापरपरामर्शविकलास्तत्रकेचन वाक्याभासान्स्वस्वपक्षेयोजयंत्यप्यलज्जया ५९

दित्याह॥ भ्रांतंत इति ५८ ननुश्रुत्यर्थप्रवक्तारोपिकेचिदित्यंकुतोनजानंतीत्याशंक्यतेषांसाकल्येनश्रुत्यर्थ १३
पर्यालोचनाभावादित्याह॥ पूर्वापरेति ५९ श्रीरामायनम॥ ॥श्रीरामचंद्रायनम॥ ॥

तत्रतावत्प्रत्यक्षैकप्रमाणमाल्पान्मत्पगमे नातिस्थूलत्वाल्लोकायतादिपक्षं प्रथमतोनुभाषते कूटस्थादीति ६० प्र
त्यक्षसिद्धं देहादेरात्मत्वं पार मार्थिकं स्यादित्याशंक्योक्तं प्रत्यक्षाभासमिति ६० ते प्रत्यक्षैकप्रमाणवादिनोपि
परप्रामोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमप्युदाहरंतीत्याह श्रोतीकर्तुमिति। कोशमयमन्नमिति

कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः लोकायताः पामराश्च प्रत्यक्षाभाससमाश्रिताः ६०
श्रोतीकर्तुस्वपक्षंते कोशमन्नमयंतथा विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे ६१

शब्देन अन्नमयकोशप्रतिपादकं स वा एष पुरुषोन्नरसमय इत्यादिवाक्यं लक्ष्यते विरोचनस्य सिद्धांतमिति तत्सि
य्य द्धांतप्रतिपादकमात्मैवेह महर्‍ मपीत्यादिवाक्यं लक्ष्यते॥ एतद्वाक्यद्वयं प्रमाणत्वेन प्रतिजानंत एवं न तु उपपा।
दयितुं क्षमाः प्रकरणविरोधादिति भावः ६१

अस्मिन्मतेदोषमदृष्टा(?)नपुरःसरंमतांतरमुत्थापयति॥ जीवात्मेति ६२ कोदृशोदेहातिरिक्त आत्माकेनवाप्रमाणेनावगम्यतइत्याशंकायामाह॥ प्रत्यक्षत्वेनेति॥ अहंवच्मि अहंपश्यामीत्यादिप्रयोगदर्शनात्॥ देहातिरिक्तात्वंबुद्धि

जीवात्मनि र्गमे देहमरणस्यात्रदर्शनात् देहातिरिक्तएवात्मेत्याहुर्लौकायताःपरे ६२ प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकिणं गमयेदिंद्रियात्मानंवच्मीत्यादिप्रयोगतः ६३ वागादीनामिंद्रियाणांकलहःश्रुतिषुश्रुतः तेनचैतन्यमेतेषामात्मत्वंततएवहि ६४ ॥श्री॥ ॥श्री॥

गम्यानींद्रियाण्यात्मेत्यर्थः ६३ नन्विंद्रियाणामचेतनानांकथमात्मत्वमित्याशंक्यश्रुतिष्विंद्रियसंवादश्रवणाच्चेतनत्वमसिद्धमित्याह वागादीनामिति॥ चेतनत्वस्यैवात्मलक्षणत्वाच्चेतनानामिंद्रियाणामात्मत्वमुचितमित्याह॥ आत्मत्वमिति ६४

मतांतरमुत्थापयति हैरण्यगर्भाइति ६५ प्राणस्यात्मत्वेश्रौतलिंगानीतिदर्शयति प्राणइति॥प्राणमयः एतस्मि
प सुप्तेजाग्रतीत्यादिनाप्राणजागरणंश्रूयते॥तत्प्राणेप्रेत्यउदतिष्ठत् तदुक्थमभवत्तदेतदुक्थमितिप्राणस्यश्रे

हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे॥चक्षुरादयस्तलोपेपिप्राणसत्वेतुजीवति ६५ प्राणो
जागर्तिसुप्तेपिप्राणश्रेष्ठ्यादिकंश्रुतं कोशः प्राणमयः सम्यग्विस्तरेणप्रपंचितः ६६ मनआ
त्मेतिमन्यंतउपासनपराजनाः प्राणस्याभोक्तृतास्पष्टाभोक्तृत्वंमनसस्ततः ६७ ॥श्री॥ ॥

त्यादिकंश्रूयते॥अन्योंतरआत्माप्राणमयइत्यादिनाप्राणमयः कोशः प्रपंचितः आदिशब्देनप्राणसंवादप्रवेशादि
कंग्राह्यं ६६ प्राणादन्यांतरस्यमनसआत्मत्ववादिनोमतंदर्शयति मनआत्मेतीतिप्राणस्यानात्मत्वेयुक्तिमाह॥ १०

चित्रदी प० मनस आत्मत्वे युक्तिमतिपादिकां श्रुतिमाह ॥ मनएवेति ॥ तस्माद्वा एतस्मात्प्राणमयादन्योंतर आत्मा मनोम

१५ यइति श्रुत्यंतरं दर्शयति श्रुतइति ॥ फलितमाह ॥ तेनेति ६८ मनसोप्यांतरस्य विज्ञानस्यात्मत्ववादिनो बौद्धस्य

मनएव मनुष्याणां कारणं बंधमोक्षयोः श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः ६८ वि
ज्ञानमात्मेति परआहुः क्षणिकवादिनः यतो विज्ञानमूलत्वं मनसोगम्यते स्फुटं ६९ अ
हंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत् ७०

मतं दर्शयति विज्ञानमिति विज्ञानस्यांतरत्वे युक्तिमाह यतइति ६९ विज्ञानमनःशब्दवाच्यस्यांतःकर १५
णस्यैकत्वात्कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तमुपपादयितुं तयोर्भेदं तावद्दर्शयति अहं ६
॥ वृत्तिरिति ७०

तयोः कार्यकारणभावमाह अहंप्रत्ययबीजत्वमिति तदेवोपपादयति अविदित्वेति ॥ अहंवृत्त्युदयाभावे इदंवृत्त्युदयादनयोः कार्यकारणभाव इत्यर्थः ७१ तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति ॥ क्षणे क्षणेति ॥ क्षणिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति स्वप्रकाशमिति ॥ स्वेनैव प्रमितत्वादित्यर्थः ७२ विज्ञानस्यात्मत्वे आग

अहंप्रत्ययबीजत्वमिदंवृत्तेरति स्फुटं अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित् ७१ क्षणे क्षणे जन्मनाशवदहंवृत्तेर्मितो यतः विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः ७२ विज्ञानमयकोशोऽयं जीव इत्यागमा जगुः सर्वसंसार एतस्य जन्मनाशसुखादिकः ७३

मः प्रमाणमित्याह विज्ञानमयेति तस्माद्वा एतस्मान्मनोमयात् अन्योऽन्तर आत्मा विज्ञानमयः विज्ञानं यज्ञं तनुत इत्यादिवाक्यं विज्ञानस्यात्मत्वप्रतिपादकमिति भावः ७३ ॥ श्री श्री ॥ ॥ श्री ॥ ॥ श्री ॥

चित्रदीप० बौद्धावांतरभेदस्य शून्यवादिनो मतं दर्शयति विज्ञानमिति ७४ तत्र श्रुतिमाह ॥ असदेवेदमिति ॥ शून्यस्यैव
१६ तद्रूपत्वेन प्रतीयमानस्य जगतः क्वागतिरित्यत आह ॥ ज्ञानेति ७५ तदेतन्मतं दूषयति ॥ निरधिष्ठानेति निःस्व
रूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानभ्रमस्यानुपपत्तेर्जगत्कल्पनाधिष्ठानस्यात्मनः सत्ताभ्युपगंतव्या किं

विज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत् ॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः ७४
असदेवेदमित्यादाविदमेव श्रुतं ततः ॥ ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रांतिप्रकल्पितं ७५ नि
रधिष्ठानविभ्रांतेरभावादात्मनोस्तिता ॥ शून्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते ७४

च ॥ शून्यवादिनापि शून्यसाक्षित्वेन अवश्यमात्माभ्युपगंतव्यः अन्यथा तस्यानभ्युपगमे अस्य
शून्यस्योक्तिः शून्यमित्यभिधानं ते बौद्धस्य तव मते न सिध्येदिति भावः ७६ ॥ छ ॥ राम ३६

कस्तत्प्रीत्यैत्यत आह॥ अन्य इति तस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्माऽऽनंदमयः अस्तीत्येवोपलब्धव्यस्तत्वभा
वेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः ७७ एवमात्मस्वरूपे विप्रतिपत्तिं

अन्योविज्ञानमयत आनंदमय आंतरः अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनं ७७ अणुर्म
हान्मध्यमो वेत्येवं तत्रापि वादिनः बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात् ७८ अणुर्वदं
त्यांतरालाः सूक्ष्मनाडीप्रचारतः॥ रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं ७९ ॥श्रीरामायनम

प्रदर्श्य तत्परिमाणविशेषेपि वादिविप्रतिपत्तिं दर्शयति अणुरिति ७८ अत्राणुवादिनस्तावद्दर्शयति॥ अणुमिति अ
णुत्वाभिधाने हेतुमाह सूक्ष्मेति। तदुपपादयति रोम्ण इति नाडीष्विति शेषः सूक्ष्मासु नाडीषु संचारोणुत्वमंतरेण न
घटत इत्यभिप्रायः ७९

चित्रदीप० अणुत्वे किं प्रमाणमित्यत आह अणोरिति ॥ अणोरणीयान्महतो महीयानित्योऽणुरात्मा चेतसा वेदितव्यः सूक्ष्मात्सूक्ष्मा

१७ सूक्ष्मतरं नित्यमित्यादिश्रुतयस्तदर्थः ८० श्रुत्यंतरमुदाहरति बालाग्रेति ८१ मध्यमपरिमाणवादिनो दर्शयति दिगं

अणोरणीयानयोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः ८० बाला

ग्रशतभागस्य शतधा कल्पितस्य च ॥ भागो जीवः स विज्ञेय इति चाहापरा श्रुतिः ८१ दिगंबरा म

ध्यमत्वमाहुरापादमस्तकं ॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि ८२ ॥ श्रीरामायनमः ॥ ॥

बरा इति ॥ तत्रोपपत्तिमाह आपादेति स एष इह प्रविष्ट आनखाग्रेभ्य इति श्रुतिरप्यत्र प्रमाणमाह ॥ आनखा १७

ग्रेति ८२ अहो भाग्यमहो भाग्यं नंदगोपव्रजौकसां यन्मित्रं परमानंदं पूर्णं ब्रह्म सनातनं ॥ ॥ श्री ॥ ॥

ननु मध्यमपरिमाणत्वे श्रुतिसिद्धो नाडीप्रचारो न घटत इत्याशंक्याह ॥ सूक्ष्मनाडी॥ति॥ यथा देहावयवयोर्हस्त
योः कंचुकप्रवेशेन देहस्य कंचुकप्रवेशेन देहस्य कंचुकप्रवेशस्तद्वत् ॥ आत्मावयवानां सूक्ष्मत्वात् नाडीषु प्रचा
रेणात्मनोपि प्रचार उपचर्यत इत्यर्थः ८३ ननु आत्मनो नियतमध्यमपरिमाणत्वे कर्मवशान्न्यूनाधिकश

सूक्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत् स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत् ८३
न्यूनाधिकशरीरेषु प्रवेशोपि गमागमैः आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं ८४

रीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्यमपरिमाणत्वाद्देहवदुभयं न विरुध्य
त इत्याह ॥ न्यूनाधिकेति फलितमाह ॥ तेनेति ८४ ॥श्रीरामायनमः॥

तू

सि॰दी॰प॰ आत्मनः सावयवत्वे घटादिवदनित्यत्वप्रसंगेनैतद्दूषयति सांशस्येति भवतु को दोषस्तत्राह॥ तथा सतीति कृतयोः
१८ पुण्यपापयोर्भोगमंतरेण नाशः कृतनाशः अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः एतद्दोषद्वयमात्मनो।

सांशस्य घटवन्नाशो भवत्येव तथा सति कृतनाशाकृताभ्यागमयोः को वारको भवेत् ८५ त
स्मादात्मा महानेव नैवाणुर्नापि मध्यमः आकाशवत्सर्वगतो निरंशः श्रुतिसंमतः ८६

अनित्यत्वाभ्युपगमे भवेदिति भावः ८५ अतः पारिशेष्यादात्मनो विभुत्वं सिद्धमित्याह तस्मादिति तत्र प्रमाण १८
माह आकाशवदिति॥ आकाशवत्सर्वगतश्च नित्यः निष्कलं निष्क्रियमित्याद्यागमः प्रमाणमित्यर्थः ८६

एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निश्चेतुं तावद्वादिविप्रतिपत्तिं दर्शयति इत्थं त्वेति ८७ अचिद्रूप
त्ववादिनो दर्शयति प्राभाकरा इति तत्प्रक्रियामनुभाषते आकाशवद्द्रव्यमिति॥ आत्मा द्रव्यं भवितुमर्हति

इत्थं त्वातद्विशेषेपि बहुधा कल्पयंत्यमुः अचिद्रूपो यं चिद्रूपश्चिदचिद्रूप इत्यपि ८७ प्राभा
करास्तार्किकाश्च प्राहुरस्याचिदात्मतां आकाशवत्तु द्रव्यमात्मा शब्दवत्तद्गुणश्चितिः ८८

गुणवत्त्वादाकाशवदित्यनुमानं सूचितं॥ आत्मनः पृथिव्यादिभ्यो भेदसाधकं विशेषगुणं दर्शयति शब्दवदिति
आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात् यत्पृथिव्यादिभ्यो न भिद्यते तन्न ज्ञानगुणकमपि न भवति य
था पृथिवी इत्यनुमानं द्रष्टव्यं ८८

चित्रदा प० तस्यैव विशेषगुणांतराण्याह इच्छेति तत्संस्काराः भावनाः ८९ एषां गुणानां उत्पत्तिविनाशकारणमाह ॥ आ

३८ त्मन इति ॥ स्वादृष्टवशतः आत्मनो मनसा योगे इत्यन्वय ९० आत्मनो चिद्रूपत्वेकथं चेतनत्वाम्रूपगमस्याशं

इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे ॥ तत्संस्काराश्च तस्यैते गुणाश्चिति विदारिताः ८९
आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः जायंते थमत्ता यंसे सुषुप्ते दृष्टसंक्षयात् ९०
चितिमत्वाच्चेतनोयमिच्छाद्वेषप्रयत्नवान् ॥ स्याद्धर्माधर्मयोः कर्त्ता भोक्ता दुःखादिमत्वतः ९१

म चितिमत्वादिस्याद चितिमत्वादिति आत्मनश्चेतनत्वे हेत्वंतरमाह ॥ इच्छेति ॥ तस्येश्वराद्भेदलक्षणमाह ॥ ३८
स्यादिति ९१ शिवरामकृष्णनमः ॥

ननुआत्मनो विभुत्वेलोकांतरगमनादिकं कथंघटते तत्साशंक्य अस्मिन्देहे कर्मवशादिच्छाद्युत्पत्तौ सत्यामत्रात्म
नोवस्थानादिव्यवहारइवकर्मवशाल्लोकांतरे देहांतरोत्पत्तौ तदवच्छिन्नात्मप्रदेशेसुखाद्युत्पत्तिवशात्तत्रात्म

यथात्रकर्मवशतःकादाचित्कंसुखादिकं॥ तथालोकांतरेदेहेकर्मणेच्छादिजन्यते ८२ एवंचसर्वगस्या
पिसंभवेतांगमागमौ कर्मकांडः समग्रोत्रप्रमाणमितितेवदन् ८३ ॥श्रीरामचंद्रायनमः॥

नोगमनादिव्यवहारइत्यौपचारिकमात्मनोगमनादिकमित्यभिप्रेत्याह॥ यथात्रकर्मवशातइति ८२ आत्म
नःकर्तृत्वादिधर्मवत्त्वेकिंप्रमाणमित्यतआह॥ कर्मकांडइति ८३ ॥श्रीरामचंद्रायनमः॥ ॥

चित्रदीप० नन्वस्मो विज्ञानमयत आनंदमयआंतर इत्यत्रानंदमयस्यात्मत्वमुक्तमिदानीमिच्छादिमानन्यः मतिपाद्यते। नः पू
२० र्वोत्तरविरोध इत्याशंक्याह आनंदमयेति सुषुप्तावस्पष्टचिद्य आनंदमयः कोशः परिशिष्यते स पूर्वकोशः
श्रोतेषु पंचकोशेषु प्रथमस्यांप्राभाकरादीनामात्मा सात्मन स्तेषु र्वोक्ता ज्ञानादयो गुणा इत्यर्थः ९ अस्से

आनंदमयकोशो यः सुषुप्तौ परिशिष्यते॥ अस्पष्टचित्स आत्मैषां पूर्वकोशोस्ततो गुणाः ९४ गू
ढं चैतन्यमुत्प्रेक्ष्य जडबोधस्वरूपतां आत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ९५

॥ वात्मनश्चिदचि
द्रूपत्वं भाट्टा वर्णयंतीत्याह॥ गूढमिति॥ भाट्टा आत्मनो गूढमस्पष्टं चैतन्यमुत्प्रेक्ष्य ऊहित्वा चिज्जडोभयात्मकतां
वर्णयंति॥ चैतन्योत्प्रेक्षायां कारणमाह॥ चिदुत्प्रेक्षेति॥ उत्थितस्मृतेश्चिदुत्प्रेक्षा भवतीति योजना॥ सुषुप्ते २०
रुत्थितस्य जायमानात्स्मरणात्सौषुप्तचैतन्यस्योत्प्रेक्षा भवतीत्यर्थः ९५ ॥श्रीरामायनमः॥ ॥

चिदुत्से क्षामकारमेवस्पष्टयति ॥ जडोऽभूत्वेति तदा सुषुप्तिकाले जडोऽभूत्वा॰ स्वाप्समित्येवंरूपा जाग्र-
स्मृतिरुत्थितस्य पुरुषस्य जायमाना सुषुप्तिकालीनजाड्यानुभवमंतरेण अनुपपद्यमाना तदानीं तन्नजा-
ड्यानुभवं कल्पयतीति भावः ९६ सुषुप्तौ चैतन्यलोपाभावे प्रमाणमाह ॥ द्रष्टुरिति ॥ नहि द्रष्टुर्दृष्टेर्वि

जडोऽभूत्वा तदा स्वाप्समिति जाड्यस्मृतिस्तदा विना जाड्यानुभूतिं न कथं चिदुपपद्यते ९६

श्रामका द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततस्त्वयं ॥ अप्रकाशाभ्यामात्मा खद्योतवद्यतः ९७

परिलोपो विद्यते ॥ अविनाशित्वादिति श्रुतौ सुषुप्तौ चैतन्यलोपाभावः श्रूयते ॥ ततोऽपि प्रकाशाप्रकाशादयमा-
त्मा खद्योतवदस्फुरणस्फुरणाभ्यां युक्तो भवतीत्यर्थः ९७ ॥ श्रीरामाय नम ॥ श्रीरामचंद्राय नम ॥

चित्रदीप० २१

अस्मिन्नाद्यमाते ह्रूपत्वाभिधानपुरःसरं सांख्यमतमुत्थापयति निरंशस्येति ९८ जाड्यस्मतेस्तर्हि का गति रित्याशंक्याह ॥ जाड्यांश इति ॥ तत्र प्रकृतिरूपं सत्वरजस्तमोगुणात्मकं ॥ प्रकृतिकल्पनायाः प्रयोजनमाह ॥ चित इति ॥ चितः पुरुषस्येति यावत् ९९ ननु चितोऽसंगत्वेन प्रकृतिपुरुषयोरत्यंतविविक्तत्वात्प्रकृतिमेव

निरंशस्योभयात्मत्वं न कथं चिद्घटिष्यते ॥ तेन चिद्रूप एवात्मेत्याहुः सांख्या विवेकिनः ९८ जाड्यांशः प्रकृते रूपं विकारि त्रिगुणं च तत् ॥ चितो भोगापवर्गार्थं प्रकृतिः सा प्रवर्त्तते ९९ असंगायाश्चितेर्बंधमोक्षौ भेदाग्रहान्मतौ बंधमुक्तिव्यवस्थार्थं पूर्वेषामिव चिद्भिदा १००

॥ स्या कथं पुरुषस्य भोगापवर्गाविप्याशंक्य तयोर्विवेकस्याग्रहणात् पुरुषे भोगापवर्गौ व्यवह्रियत इत्याह ॥ असंगाया इति ॥ २१ तार्किकवादिभिरिव सांख्यैरात्मभेदोंगीक्रियत इत्याह ॥ बंधमुक्तीति १०० ॥ श्रीरामचंद्रायनमः ॥

प्रकृतिसद्भावे पुरुषस्यासंगत्वेच श्रुतिमुदाहरति॥ महत इति १ एवं जीवविषयां वादिविप्रतिपत्तिं प्रदर्श्येश्व
रविषयां तां प्रदर्शयितुमीश्वररूपं तावत्स्थापयति चित्सन्निधाविति॥ ननु प्रकृतिपुरुषातिरिक्तेश्वरक
ल्पनमप्रमाणमित्याशंक्याह॥ स जीवेभ्य इति २ तामेवेश्वरसद्भावप्रतिपादिकां श्रुतिं पठति॥ प्रधानं गुणसा

महतः परमव्यक्तमिति प्रकृतिरुच्यते श्रुतावसंगतातद्वदसंगो हीत्यतः स्फुटा १०१ चित्सन्निधौ
प्रवृत्तायाः प्रकृतेर्हि नियामकं ईश्वरं ब्रुवते योगाः स जीवेभ्यः परः श्रुतः २ प्रधानक्षेत्रज्ञपति
र्गुणेश इति हि श्रुतिः आरण्यके संभ्रमेणत्यंतयाम्युपपादितः ३ ११ ॥श्रीरामचंद्रायनमः॥

म्यावस्थारूपं क्षेत्रज्ञा जीवास्तेषां पतिः गुणाः सत्वादयस्तेषामीशो नियामक इत्यर्थः न केवलमियमेव श्रु
तिरीश्वरप्रतिपादिकांतर्यामिब्राह्मणमप्यस्त्याह॥ आरण्यक इति १०३ ॥श्री॥ ॥श्री॥ ॥

चित्रदी० तामेवृवादिविप्रतिपत्तिं प्रतिजानीते॥ अत्रापीति मतामनतिक्रम्य यथामतं ४ दानीं पतंजलिनोक्तमीश्व

२२ रप्रतिपादकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सूत्रमर्थतः पठति॥ क्लेशेति॥

क्लेशा अविद्यादयः कर्माणि कर्म शुक्लकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रितानि॥ सति मूले त

अत्रापि कल्पयन्त्येते वादिनः स्वस्वयुक्तिभिः॥ वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरन्ति हि १०४

क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः॥ पुंविशेषो भवेदीशो जीववत्सोप्यसंगचित् १०५

द्विपाको जात्यायुर्भोगाः इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशयाः तेषां संस्कारास्ते क्लेशादिभिरसंस्पृष्टः पुरु २२

षविशेष ईश्वरो भवति॥ सोपि० जीववदसंगश्चिद्रूपश्चेत्यर्थः॥ १०५॥ ॥श्रीरामायनमः॥ ॥

43

नन्वसंगश्चिद्रूपत्वे कथं नियंतृत्वमित्यत आह तथापीति ईश्वरस्य नियंतृत्वानभ्युपगमे दोषमाह अव्यवस्था
विति ६ असंगस्येश्वरस्य नियंतृत्वे निश्चमाणक मित्याशंक्याह ॥ भोगेति तन्नियंतृत्वं कृतं नुनकृतमप्य
युक्तं कथमंगीक्रियत मित्यत आह युक्तमपीति ॥ जीवधर्मस्य क्लेशादेरभावादुपपन्नं चेत्यर्थः १०३ ननु जी॥

तथापि पुंविशेषत्वादृते तस्य नियंतृता अव्यवस्थौ बंधमोक्षावापतेतामिहान्यथा ६ भोगा
भ्यासादिसेवमादाव संगस्य परात्मनः ॥ कृतं तत्फलमप्यस्य क्लेशकर्माद्यसंगमात् ७ जीवाना
मप्यसंगत्वात्क्लेशादिर्नेत्यथापि च ॥ विवेकाग्रहतः क्लेशकर्मादि प्रागुदारितं ८ ॥श्री॥

वा अप्यसंगश्चिद्रूपाः क्लेशादिरहिता एव तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वे
ऽपि बुध्यासह विवेकाग्रहात् क्लेशादिरस्तीति पूर्वोक्तं स्मारयति ॥ जीवानामिति १०४ ॥श्री॥

चित्रदीप
२३

तार्किकास्त्वसंगस्य नियामकत्वमसहमाना जीवविलक्षणत्वाय ज्ञानादिगुणत्रयं नित्यमंगीकुर्वंत इत्याह॥ नित्यज्ञा
नेति १९ नन्विच्छादिगुणकस्य तस्य कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणानां नित्यत्वादेवेति परिहरंति पुंविशेष

नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते॥ असंगस्य नियंतृत्वमयुक्तमिति तार्किकाः १०९ पुंवि
शेषत्वमप्यस्य गुणैरेव न चान्यथा॥ सत्यकामः सत्यसंकल्प इत्यादिश्रुतिर्जगौ ११० नित्यज्ञा
नादिमत्त्वेऽस्य सृष्टिरेव सदा भवेत्॥ हिरण्यगर्भ ईशोतो लिंगदेहेन संयुतः १११॥

त्वमिति॥ गुणानां नित्यत्वे प्रमाणमाह॥ सत्येति ११० तत्रापि दोषसद्भावात्पक्षांतरमाह॥ नित्येति॥ तस्य हिरण्यगर्भ
स्य किंरूपमित्यत आह॥ लिंगदेहेति॥ मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यत

हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह ॥ उक्तेति ॥ ननु लिंगशरीरयोगे जीवः स्यादिति शंकां विद्याकामक
र्माभावान्न जीव इत्याह ॥ लिंगसत्त्वेपीति १२ केवले लिंगशरीरस्य स्थूलशरीरं विहायानुपलभ्यमानत्वात् स्थूलश

उक्तोयब्राह्मणेन तस्य माहात्म्यमति विस्तृतं ॥ लिंगसत्त्वेपि जीवत्वं नास्य कर्माद्यभावतः १२ स्थूलदे
हं विना लिंगदेहो न क्वापि दृश्यते ॥ वैराजो देह ईशोतः सर्वतो मस्तकादिमान् १३ सहस्रशी
र्षेत्येवं च विश्वतश्चक्षुरित्यपि ॥ अत मित्याहुरनिशं विश्वरूपस्य चिंतकाः १४ ॥ श्रीरामजी

रीरसमष्ट्यभिमानी वैराज ईश्वर इत्याह स्थूलदेहं विनेति १३ तत्सद्भावे प्रमाणमाह सहस्रशीर्षेति ॥ अ
तं वा अमिति शेषः विश्वरूपस्य चिंतकाः विराडुपासकाः १४

अत्रापि दोषपरस्यादेवतांतरमालंबनइत्याह ॥ सर्वतइति २५ एवं कैरुच्यतइत्यत आह ॥ पुत्रार्थमिति ॥ प्रजापतिः प्रजा

असृजतेत्यादिवाक्यंतत्रप्रमाणमित्याह ॥ प्रजापतिरिति २६ भागवतमतमाह ॥ विष्णोरिति २७ शैवानांम

सर्वतः पाणिपादत्वेहन्मादेरपि चेश्वता ॥ ततश्चनुर्मखोदेहएवेशोनेतरः पुमान् २५ पुत्रार्थंतमुपा

सीनाएवमाहुः प्रजापतिः ॥ प्रजा असृजतेत्यादिश्रुतेश्चोदाहृतंतमी २६ विष्णोर्नाभेः समुद्भूतो

वेधाः कमलजस्ततः ॥ विष्णुरेवेशइत्याहुर्लोकेभागवताजनाः २७ शिवस्यपादावन्वेष्टुं शा

र्ङ्गीशक्तस्ततः शिवः ॥ ईशोनविष्णुरित्याहुः शैवाआगममानिनः २८ पुरत्रयंसाधयितुं वि

घ्नेशंसोप्यपूजयत् ॥ विनायकंमाहुरीशंगाणपत्यमतेरताः २९ ॥ श्रीरामायनमः ॥

तमाह ॥ शैवस्येति २८ गाणपत्यमतमाह ॥ पुरत्रयमिति २९ ॥ श्रीजगंनाथायनमः ॥ श्रीरामचंद्रायनमः ॥

उक्तन्यायमन्यत्राप्यतिदिशति॥ एवमिति॥ अन्येभैरवबेतालादयः पासकाः अन्यथान्यथावर्णनेकारणमाह॥ स्वेति॥ तत्रतत्रप्रमाणानिसंतीतिदर्शयति॥ मंत्रेति २० एवंकृतिमतानांसाशंकत्वअसंरम्भोनास्माह॥ अंतर्या मिणः एवमिति॥ स्थावरेशवादेनक्वापिदृष्टचरत्वसाशंकमाह॥ अश्वत्थार्केति २१ नन्वेवंमतभेदेकसोपादेयत्वं

एवमन्येस्वस्वपक्षाभिमानेनान्यथान्यथा॥ मंत्रार्थवादकल्पादीनाश्रित्यप्रतिपेदिरे २० अं
तर्यामिणमारभ्यस्थावरांतेशवादिनः संत्यश्वत्थार्कवंशादेःकुलदेवत्वदर्शनात् २१ त
त्वनिश्चयकामेनन्यायागमविचारिणां॥ एकैवप्रतिपत्तिःस्यात्साप्यत्रस्फुटमुच्यते २२

कस्यवादेयत्वमित्याकांक्षायामाह॥ तत्वनिश्चयेति॥ तत्वनिश्चयकामेनतत्वनिश्चयेच्छयान्यायागमयोर्विचारण शीलानांपुरुषाणांप्रतिपत्तिरेकैवस्यात्॥ साकीदृशीत्यतआह॥ साप्यत्रेति २२ ॥श्रीरामायनम॥ ॥

ता

48

नामेवमतिपत्तिंदर्शयितुंतदनुकूलांश्रुतिंपठति॥मायांत्विति॥मायामेवप्रकृतिंजगदुपादानकारणंविद्यात् जानीयात्॥मायिनंतुमायोपाधिकमंतर्यामिणमेवमहेश्वरंमायाधिष्ठातारंनिमित्तकारणंजानीयात्॥अस्यमायिनोमहेश्व

मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं॥अस्यावयवभूतैस्तुव्याप्तंसर्वमिदंजगत् २३ इति श्रुत्यनुसारेणन्याय्योनिर्णयईश्वरे॥तथासत्यविरोधःस्यात्स्थावरांतेशवादिनां २४

रस्यअवयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैःकृत्स्नमिदंजगत्व्याप्तमित्यस्याःश्रुतेरित्यर्थः २३ एतत्श्रुत्यनुसारेणेश्वरविषयोनिर्णयोयुक्तइत्याह॥इतीति॥कुतोयुक्तइत्याशंक्यसर्वत्राविरुद्धत्वादित्याह॥तथेति॥सर्वस्यापीश्वरत्वाभ्युपगमान्नकेनापिविरोधइतिभावः २४ २५

ननु जगत्प्रकृतिभूतायाः मायायाः किंरूपमित्यत आह ॥ मायाचेयमिति ॥ कुत इत्यत आह ॥ तापनीय इति ॥ मा
या च [illegible] तमोरूपेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानात् इत्यर्थः ॥ मायायास्तमोरूपत्वे किंप्रमाण
मित्याकांक्षायामनुभूतेरिति श्रुतिरेवात्रानुभवः प्रमाणमिति प्रतिजानीत इत्याह ॥ अनुभूतिमिति २५ तत्र

मायाचेयं तमोरूपा तापनीये तदीरणात् ॥ अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयं २५
जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः आबालगोपं स्पष्टत्वादानंत्यं तस्य साब्रवीत् २६

मायायास्तमोरूपत्वे कोसावनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवात्रानुभवं स्पष्टयतीत्याह ॥
जडमिति ॥ अनंतमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यत इत्याह ॥ आबालेति ॥ जडं मोहं च प्रकृतेः कार्यमिति ॥ आ
बालगोपालादीनां सर्वेषामनुभव इत्यर्थः २६

चित्रदी॰प॰ २६

जडशब्दस्यार्थमाह॥ अचिदात्मेति॥ मोहशब्दार्थमाह॥ यत्रेति २७ उक्तप्रकारेण सर्वानुभवसिद्धत्वलक्षणमानं (वा)
स्पंसिद्धमित्याह॥ इत्थमिति॥ एतज्जाड्यंमोह॥ लक्षणतमोरूपत्वं॥ नन्वेवंमायायाःसर्वानुभवसिद्धत्वे घटादिव

अचिदात्मघटादीनांयत्स्वरूपंजडंहितत्॥ यत्रकुंठीभवेद्बुद्धिःसमोहइतिलौकिकाः २७
इत्थंलौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते॥ युक्तिदृष्ट्यात्वनिर्वाच्यंनासदासीदितिश्रुतेः २८

त्सत्वेनानिर्वचनीयत्वंस्यादित्याशंक्याह॥ युक्तीति॥ तुशब्दःशंकाव्यावृत्यर्थः॥ अनिर्वाच्यंसत्वेनासत्वेनसदसत्वे २६
नवानिर्वक्तुमशक्यं॥ तत्रकिंप्रमाणमित्यतआह॥ नासदिति २८ ॥श्रीरामायनमः॥ ॥श्री॥ ॥

अस्याः श्रुतेरभिप्रायमाह॥ नासदिति॥ बाधनान्नेह नानास्ति किंचनेति श्रुत्या निषेधादित्यर्थः॥ सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति श्रुत्योपेक्षितं॥ एवं युक्तिदृष्ट्या निर्वचनीयत्वमुपदर्श्य तुच्छमिदं रूपमस्येति श्रुतिः विद्वदनु

नासदासीद्विभातत्वान्नो सदासीच्च बाधनात् विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः २९
तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकिकैः ३०

भवेन तस्यास्तुच्छत्वं दर्शयतीत्याह॥ तुच्छत्वे हेतुमाह॥ तस्येति २९ उपपादितमर्थमुपसंहरति॥ तुच्छेति॥ श्रौतबोधेन तुच्छा कालत्रयेप्यसती यौक्तिकबोधेनानिर्वचनीया लौकिकबोधेन वास्तवी चेत्येवं त्रिधा माया ज्ञेयेत्यर्थः ३०

चित्रदी० असत्यसत्वमसत्वंचदर्शयतीतिश्रुतेरर्थः॥अस्याःकृत्यमाह॥असत्येति॥एकस्याएवमायायाःजगत्सत्वासत्वप्र
२७ दर्शकत्वेदृष्टांतमाह॥प्रसारणादिति ३१ स्वतंत्रास्वतंत्रत्वेनेतिश्रुत्यामायायाःस्वातंत्र्यास्वातंत्र्येदर्शिते॥तत्रो
भयत्रोपपत्तिमाह॥अस्वतंत्रेति॥स्वभासकचैतन्यंविनाप्रकाशनरत्यस्वतंत्रा॥ऽसंगस्यात्मनोन्यथाकर

असत्यसत्वमसत्वंचजगतोदर्शयत्यसौ॥प्रसारणाच्चसंकोचाद्यथाचित्रपटस्तथा ३१ अस्वतं
ति त्राहिमायास्यादप्रतीतेर्विनाचितिं स्वतंत्रापितथैवस्यादसंगस्यान्यथाकृतेः ३२ कूटस्थासं
गमात्मानंजगत्वेनकरोतिसा॥चिदाभासस्वरूपेणजीवेशावपिनिर्ममे ३३

णात्स्वतंत्रापीत्यर्थः ३२ अन्यथाकरणमेवस्पष्टयति॥कूटस्थासंगमिति॥जीवेशावाभासेनकरोतीतिश्रुत्युक्तं २७
जीवेश्वरविभागंचकरोतीत्याह॥चिदाभासेति ३३

नन्चात्मनोन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह॥ कूटस्थमिति॥ ननु कूटस्थत्वाविघातेन जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायायाः दुर्घटैकविधायित्वान्नेदमाश्चर्यकारणमित्याह॥ दुर्घटेति॥ अन्यथा मायात

कूटस्थमनुपद्रुत्य करोति जगदादिकं॥ दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः ३४ द्रवत्व
मुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायायां दुर्घटत्वं च स्वतः सिध्यति नान्यतः ३५ ॥श्री॥

मेव भज्येतेति भावः ३४ मायायाः दुर्घटकारित्वस्वभावे दृष्टांतमाह॥ द्रवत्वमुदक इति॥ उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायायाः दुर्घटकारित्वमित्यर्थः ३५

चित्रदी०
२८

ननु मायायाः दुर्घटकारित्वमाश्चर्यकारणं न भवतीत्युक्तं अनुपपन्नं लोके मायाया चमत्कारहेतुत्वदर्शनादित्या
शंक्य मायामयत्वसाक्षात्कारपर्यंतमेवास्या आश्चर्यकारणत्वं नोपरिष्टादित्याह ॥ न वेत्तीति ३६ किंच जगत्सत्य

न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं ॥ धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति ३६ प्र
सरंति हि चोद्यानि जगद्वस्तुत्ववादिषु ॥ न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः ३७ चोद्ये
पि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया ॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां ३८

त्ववादिनो नैयायिकादीन्प्रत्येव सर्वविधानि चोद्यानि कर्त्तव्यानि न मायावादिनं प्रतीत्याह ॥ प्रसरंतीति ३७ मायावादि
नं प्रति चोद्यकरणे ऽतिप्रसंगमाह ॥ चोद्येपीति ॥ तर्हि किं कर्त्तव्यमित्यत आह ॥ परिहार्यमिति ३८ २८

उक्तमेवार्थं प्रपंचयति॥ विस्मयेति ३९ मायात्वनिश्चये तत्परिहारान्वेषणमुचितं स एवेदानीं सिद्ध इति शंक
ते॥ मायात्वमिति॥ मायालक्षणसद्भावान्मायात्वं निश्चीयतामित्यभिप्रायेणाह॥ नहीति॥ किंलक्षणमित्यत आ

विस्मयैकशरीराया मायायाश्चोद्यरूपतः॥ अन्वेष्यः परिहारोऽस्या बुद्धिमद्भिः प्रयत्नतः ३९
मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु॥ लोकप्रसिद्धमायाया लक्षणं यत्तदीक्ष्यतां ४०
न निरूपयितुं शक्या विस्पष्टं भासते च या॥ सा मायेतींद्रजालादौ लोकाः संप्रतिपेदिरे ४१
स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणं॥ मायामयं जगत्तस्मादीक्षस्वापक्षपाततः ४२

ह॥ लोकेति ४० तस्यापि किंलक्षणमित्यत आह॥ न निरूपयितुमिति ४१ दृष्टांते सिद्धलक्षणं दार्ष्टांतिके योजय
ति॥ स्पष्टमिति ४२

जगतोऽशक्यनिरूपणत्वं कथमित्याशंक्य तद्दर्शयति ॥ निरूपयितुमिति ४३ अशक्यनिरूपणत्वमेव उदाहरणेन स्पष्टयति ॥ देहेंद्रियेति ४४ स्वभाववादी शंकते ॥ वीर्यस्येति । सिद्धांती पृच्छति कथमिति ॥ अन्वयव्यतिरेका

निरूपयितुमारब्धे निखिलैरपि पंडितैः ॥ अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित् ४३
देहेंद्रियादयो भावा वीर्येणोत्पादिताः कथं कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरं ४४ वि
र्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया ॥ अन्वयव्यतिरेकौ यौ भग्नौ तौ व्यर्थवीर्यतः ४५ न जा
नामि किमप्येतदित्यंते शरणं तव ॥ अत एव महांतोऽस्य प्रवदंतींद्रजालतां ४६ ॥ श्री ॥

भ्यां जानामीत्याशंक्य व्याप्तभावान्नैवमित्याह ॥ अन्वयेति ४५ एवं पुनः पुनः पृष्टे सति किमपि न जानामीत्येवोत्त
रं देयमिति फलितमाह ॥ न जानामीति ४६

उक्तानिर्वचनायत्वेन वृद्धसंमतिं दर्शयति ॥ एतस्मादिति ४७ न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किंतु वटरक्षा

एतस्मात्किमिवेंद्रजालमपरं यद्गर्भवासस्थितं रेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानांकुरं ॥
पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोति ॥ जिघ्रति तथा गच्छत्यथागच्छ
ति ४७ देहवद्वटधानादौ सुविचार्यावलोक्यतां ॥ क्व धानाः कुत्र वा वृक्षस्तस्मान्मायेति नि
श्चितु ४८ निरुक्तावभिमानं ये दधते तार्किकादयः ॥ हर्षमिश्रादिभिस्ते तु खंडनादौ सुशि

देरपी साह ॥ देहवदिति ४८ नन्वस्माभिर्निर्वक्तुमशक्यत्वेपि उदयनादिभिराचार्यैर्निरुक्तत्वात्सांशं स्याह निरु

चित्रदी० उक्तार्थे सांप्रदायिकानां वाक्यं संवादयति॥ अचिंत्या इति ५० ननु भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किमायातमित्यत आह॥ अचिंत्यरचनेति॥ अचिंत्यरचनाशक्तिमद्बीजं कारणं सैव मायेत्यर्थः ननु एवं विधं कारणं ब्र
३०

अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत्॥ अचिंत्यरचनारूपं मनसापि जगत्खलु ५० ख
अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु॥ मायाबीजं तदेवैकं सुषुप्तावनुभूयते ५१
म जाग्रत्स्वप्नजगत्तत्र लीनं बीजइवद्रुमः॥ तस्मादशेषजगतां वासनास्तत्र संस्थिताः ५२

ह्मेत्यत आह॥ मायेति ५१ कथं तस्य जगद्बीजत्वमित्यत आह॥ जाग्रदिति॥ ततः किमित्यत आह॥ तस्मा ३०
दिति॥ यतो जगत्कारणं मायाऽतोऽशेषजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः ५२ ॥श्री॥

ततोपि किंचिन्नास्ति॥ यावद्बुद्धिवासना इति॥ ननु तासु प्रतिबिंबोस्ति चेत्कुतो नानुभूयत इत्याशंक्य अस्पष्टत्वादित्याह॥ मे
घेति॥ तर्हि कुतस्तत्सिद्धिरित्यत आह॥ अनुमीयतामिति ५२ ननु मेघाकाशोदकस्थाकाशप्रतिबिंबत्वेपि ज्ञा
ज्ञातीयस्य घटोदकस्थस्याकाशप्रतिबिंबवतः सद्भावान्मेघाकाशानुमानं घटते इह तथाविधदृष्टांताभावात्क

यावद्बुद्धिवासनास्तासु चैतन्यं प्रतिबिंबति॥ मेघाकाशवदस्पष्टं चिदाभासोनुमीयताम् ५३ सा
भासमेव तद्बीजं धीरूपेण प्ररोहति॥ अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते ५४

थमनुमानोदय इत्याशंक्यान्यापि तथाविधदृष्टांतसंपादनायाह॥ साभासमिति॥ चिदाभासविशिष्टं तदेवाज्ञानं
बुद्धिरूपेण परिणममानं विस्पष्टचिदाभासवद्भवतीति भावः एवं चेदमनुमानमप्यत्र सूचितं भवति॥ विमता
बुद्धिवासनाश्चित्प्रतिबिंबवत्यो भवितुमर्हंति॥ बुध्यवस्थाविशेषत्वात्॥ बुद्धिवदिति ५४

चित्रदी॰प॰ ३१

एवंजीवेश्वरयोर्मायिकत्वंश्रुत्युक्तमुपपादितमुपसंहरति॥मायाभासेनेति॥ननुजीवेशयोर्मायिकत्वेसमानेकथ मवांतरभेदसिद्धिरित्याशंक्यास्पष्टास्पष्टोपाधिमत्त्वेनमेघाकाशजलाकाशयोरिवतत्सिद्धिरित्याह॥मेघाकाशे

मायाभासेनजीवेशौकरोतीतिश्रुतौश्रुतं॥मेघाकाशजलाकाशाविवतौसुव्यवस्थितौ ५५
मेघवद्वर्ततेमायामेघस्थिततुषारवत्॥धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः ५६
मायाधीनश्चिदाभासःश्रुतोमायीमहेश्वरः॥अंतर्यामीचसर्वज्ञोजगद्योनिःसएवहि ५७

ति॥५५॥ईशस्यमेघाकाशसाम्यंस्फुटीकरोति॥मेघवदिति ५६ मायाप्रतिबिंबस्येश्वरत्वेकिंप्रमाणमित्याशंक्य श्रुतिरेवेत्याह॥मायाधीनइति॥नकेवलमीश्वरत्वमस्यश्रुतंअपितुअंतर्यामित्वादिकमपिधर्मजातंश्रुतम स्तीत्याह॥अंतर्यामीति ५७

३१

ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति ॥ सौषुप्तमिति ॥
सुषुप्तस्थाने एकीभूतः प्रज्ञानघन एवेत्यादिका श्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्रति

सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ ॥ एष सर्वेश्वर इति सोऽयं वेदोक्त ईश्वरः ५८ सर्वज्ञत्वा
दिके तस्य नैव विप्रतिपद्यतां श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्वसंभवात् ५९ ॥श्री॥

पादयतीत्यर्थः ५८ ननु आनंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह ॥ सर्वज्ञत्वादिक इति ॥ कुत इत्यत
आह ॥ श्रौतेति ॥ इतोऽपि न विप्रतिपत्तिः कार्येत्याह ॥ मायायामिति ५९ ॥श्रीरामायनमः॥ ॥

नन्वनुकूलत्वयुक्तभावेश्वानिरपिशाचवफलवाक्यवदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादि
कमुपपादयति॥ अयमिति॥ अयमानंदमयो यज्जाग्रदादि विश्वं सृजति तदन्यकेनाप्यन्यथाकर्तुं शक्यते॥ अतोयंस

अयंयत्सृजतेविश्वंतदन्यथयितुंपुमान्॥ नकोपिशक्तस्तेनायंसर्वेश्वरइतिस्मृतः ६० अशेषप्राणि
बुद्धीनांवासनास्तत्रसंस्थिताः॥ ताभिः क्रोडीकृतंसर्वंतेनसर्वज्ञईरितः ६१ ॥श्रीरामचंद्राय०

र्वेश्वर इत्यर्थः ६० इदानीं सर्वज्ञत्वमुपपादयति॥ अशेषेति॥ तत्र सौषुप्ते ज्ञाने कारणभूते कार्यभूतानां सर्वप्रा
णिबुद्धीनां वासना निवसंति॥ ताभिश्च वासनाभिः सर्वं जगत् क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवासनावद्
ज्ञानोपाधिकत्वेन सर्वज्ञ उच्यत इत्यर्थः ६१

ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभूयते इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह ॥ वासनानामिति ॥ कथं तर्हि तदवगम इत्याशंक्याह ॥ सर्वबुद्धिष्विति ॥ सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतसर्वज्ञत्वपुरःसरं भवितुमर्हति ॥ कार्यनिष्ठधर्मो विशेषत्वात् पटगतरूपादिवदित्यर्थः ६२ सर्वज्ञत्वमु

वासनानां परोक्षत्वात्सर्वज्ञत्वं न दृश्यते ॥ सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयतां ६२ विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि ॥ अंतस्तिष्ठन्नयमयतिते नांतर्यामितां व्रजेत् ६३ बुद्धौ तिष्ठन्नांतरोस्या धियानीक्ष्यश्च धीवपुः ॥ धियमंतर्यमयतीत्येवं वेदेन घोषितं ६४

॥पपाद्येषांतर्यामीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ विज्ञानमयेति ॥ अन्यत्र पृथिव्यादौ तिष्ठन्नयमयतीत्यत्रतत्रेत्यन्वयः ६३ अस्मिन्नर्थेंतर्यामिब्राह्मणं कृत्स्नं प्रमाणमिति दर्शयितुं तदेकदेशभूतं यो विज्ञाने तिष्ठन्नित्यादिवाक्यमर्थतोनुक्रामति ॥ बुद्धावि

चित्रदी॰ प॰ इदानीमंतर्यामिणो ब्रह्मणः सर्वांतरत्वं श्रुतिप्रसिद्धमुपपादयिष्यन्नादौ तस्य सर्वोपादानत्वं व्याख्यानेनोपपादयति । ॥ ...
३२ ... सर्वोपादानत्वेन सर्वत्र स्थितिरिति ... ॥ तंतुः पट इति

तंतुः पटे स्थितो यद्वदुपादानतया तथा ॥ सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ६५ पटा
दप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः ॥ आंतरत्वस्य विश्रांतिर्यत्रासावनुमीयतां ६६ ॥

॥६५॥ ननु उपादानतया सर्वत्रायमवस्थितश्चेत्किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह ॥ ३२
पटादपीति ॥ अत्रेदमनुमानं ॥ आंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वादणुत्वतारतम्यवदिति ६६ ३३

65

नन्वांतरत्वेप्येवं दिवदंतर्यामिणो दर्शनं किं न स्यादित्याशंक्य तेषामिव वा तद्घटत्वाभावान्न दृश्यत इत्यभिप्रायेणाह ॥ हिम्यांतरत्वेति ॥ कुतस्तर्हि तन्निर्णय इत्यत आह नन्विति । अचेतनस्य चेतनाधिष्ठानमंतरेण प्रवृत्त्यनु

हिम्यांतरत्व वृक्षाणां दर्शनेप्ययमांतरः ॥ नवास्ते ततो युक्तिश्रुतिभ्यामेव निर्णयः ६७
पटरूपेण संस्थानात्पटस्तंतोर्वपुर्यथा ॥ सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ६८

पपत्तियुक्तिः श्रुतिस्तदात्मनेव ॥ ६७ ॥ यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह ॥ पटरूपेणेति ॥ पटरूपेणाव
स्थितस्य तंतोः पटः शरीरं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः ६८ ॥ श्रीरामचंद्रार्पणमस्तु ॥

चित्रदीप० यः सर्वाणि भूतानि अंतरो यमयतीति वाक्यसमस्तं सर्वं सद्दृष्टान्तमाह॥ श्लोकद्वयेन॥ तंतोरिति॥ तंतुसंकोचा

३४ दिना पटसंकोचादिर्यथा भवति एवं पृथिव्यादिषूपादानत्वेनावस्थितेनांतर्यामी मायया यया वासनया यथा यथा।

तंतोः संकोचविस्तारचलनादौ पटो यथा॥ अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक् ६९ त

थांतर्याम्ययं यत्र यया वासनया यथा॥ विक्रियते तथावश्यं भवत्येव न संशयः ७०

घटादिकार्यरूपेण विक्रियते तथा तत्तत्कार्यजातं तथा तथावश्यं भवतीति भावः ७० एवमंतर्यामिश्रुतिपादि ३४

कामश्रुति मुपन्यस्य स्मृतिमप्युपन्यस्यति॥ ईश्वर इति ७१ ॥श्रीरामाय नमः॥ ॥श्रीरामचंद्राय नमः॥

सर्वभूतानामिति पदस्यार्थमाह॥ सर्वभूतानीति॥ ते च तद्धृदयपुंडरीके स्थिताः॥ ननु तेषां कुतो हृदयवस्थानमि त्याशंक्य तद्धृंतर्यामिणो विज्ञानमयाकारेण परिणामादित्याह॥ तदुपादानेति ७२ यंत्रारूढानामत्र यंत्रारो

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ७१ सर्व
भूतानि विज्ञानमयास्ते हृदये स्थिताः॥ तदुपादानभूतेशस्तत्र विक्रियते खलु ७२ देहादि
पंजरं यंत्रं तदारोहोऽभिमानिता॥ विहितमतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत् ७३ विज्ञानम
यरूपेण तत्प्रवृत्तिस्वरूपतः॥ स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत् ७४

हशब्दयोरर्थमाह॥ देहादीति भ्रामयन्निति पदेऽप्रकृतस्यार्थमाह॥ विहितेति ७३ इदानीं णिचप्रत्ययमायापद
योरर्थमाह॥ विज्ञानमयेति ७४

चित्रदी० ७० श्रौतस्य यमयतीतिपदस्याप्ययमेवार्थ इत्याह ॥ अंतर्यमयतीति ॥ उक्तव्याख्यानं पर्यायांतरेष्वतिदिशति ॥ पृथि-
३५ व्यादिष्विति ॥ ७५ ॥ प्रवृत्तिज्ञानस्य सर्वेश्वराधीनत्वे वचनांतरमुदाहरति ॥ जानामि धर्ममिति ७६ ननु प्रवृत्ते-

अंतर्यमयतीत्यस्याऽयमेवार्थः श्रुतौ श्रुतः ॥ पृथिव्यादिषु सर्वत्र न्यायो ऽयं योज्यतां धिया ७५
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ॥ केनापि देवेन हृदि स्थितेन यथा नियु-
क्तो ऽस्मि तथा करोमि ७६ नार्थः पुरुषकारेणेत्येवं माऽऽशंक्यतां यतः ॥ ईशः पुरुषकारस्य रूपेणापि

रीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्नैवमिति परिहरति ॥ ना- ३५
र्थ इति ॥ अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः ७७

ननु पुरुषप्रयत्नस्यापीश्वररूपत्वेप्रयतिप्रयत्नातिप्रतिपादितमंतर्यामिप्रेरणं व्यर्थं स्यादित्याशंक्यतद्बोधेनस्वात्मासंगत्वज्ञानलक्षणफलस्य सत्वान्मैवमिति परिहरति ॥ ईदृगिति ॥ ईदृग्बोधेनेशस्य पुरुष

ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां ॥ तथापीशस्य बोधेन स्वात्मासंगत्वधीजनिः ७८
तावता मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा ॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं ७९

कारादिरूपेणाप्यवस्थानज्ञानेन प्रवृत्तिः ॥ अंतर्यामिरूपेण प्रेरणं ७८ आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह ॥ तावतेति ॥ श्रुतिस्मृत्यादितस्यानतिलंघनीयत्वेऽस्मृतिं दर्शयति ॥ श्रुतिस्मृती ति ७९

चित्रदीप
३६

श्रुत्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह ॥ आम्नाया इति ॥ ईश्वरस्य भीतिहेतुत्वं किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वसांतर्यामित्वतः पार्थक्यसिद्ध्यर्थ इतिमत्वाह ॥ सर्वेश्वरत्वमिति ८० बहिरंतश्चेश्वरत्वनियामकत्वे श्रुतिद्वयमाह ॥ एतस्यवा इति ८१ क्रमप्राप्तस्येश्वरयोनिरित्यस्यार्थमाह ॥ जगद्योनिरिति ॥ प्रतिज्ञातार्थप्रभवाप्ययोहि भूताना

आम्नाया भीतिहेतुत्वं भीषास्मादितिहि श्रुतं ॥ सर्वेश्वरत्वमेतस्मादंतर्यामित्वतः पृथक् ८०

एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः ॥ अंतः प्रविष्टः शास्तायं जनानामिति च श्रुतिः ८१

जगद्योनिर्भवेदेष प्रभवाप्ययकृत्वतः ॥ आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ ८२

मिति वाक्यं तेतुत्वेन योजयति ॥ प्रभवेति ॥ प्रभवाप्ययावुत्पत्तिप्रलयौ तत्कर्तृत्वाज्जगद्योनिरित्यर्थः ॥ उत्पत्तिप्रलयशब्दयोर्विवक्षितमर्थमाह ॥ आविर्भावेति ॥ उत्पत्तिप्रलयावाविर्भावतिरोभावौ मतावितियोजना ८२

राम
३६

71

आविर्भावकारित्वं सदृष्टांतमुपपादयति॥ आविर्भावयतीति॥ यथा संकुचितश्चित्रपटः स्वप्रसारणेन स्वनिष्ठानि चित्राणि आविर्भावयति॥ एवमाशेषोपात्तर्थः ८३ तस्यैव प्रलयकारणत्वं दर्शयति॥ पुनरिति॥ स एव

आविर्भावयति स्वस्मिन्विलीनं सकलं जगत्॥ प्राणिकर्मवशादेष पटोयद्वत्प्रसारितः ८३
पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत्॥ प्राणिकर्मक्षयवशात्संकोचितपटो यथा ८४
रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने॥ तूष्णींभावमनोराज्ये इव सृष्टिलयाविमौ ८५

पटः संकुचितश्चित्राणि यथा तिरोभावयति॥ तद्वदित्यर्थः ८४ आविर्भावतिरोभावयोर्दृष्टांतांतराणि दर्शयति॥ रात्रिघस्राविति॥ घस्रोऽहः ८५

72

चित्रदीप० ३७

नन्वीश्वरस्य जगद्योनित्वं किमारंभकत्वेन किंवा तदाकारपरिणामित्वेन नाद्यः॥ अद्वितीयस्यारंभकत्वायोगात्॥ न द्वितीयः॥ निरवयवस्य परिणामासंभवादित्याशंक्य विवर्तवादाश्रयणान्नायं दोष इति परिहर

आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना॥ आरंभपरिणामादिचोद्यानां नात्र संभवः ८६ अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा॥ चिदाभासांशतस्त्वेव जीवानां कारणं भवेत् ८७

ति॥ आविर्भावेति ८६ नन्वेकरूपेश्वरः कथं चेतनाचेतनजगदुपादानं भविष्यतीत्याशंक्योपाधिस्थाधाम्येनाचेतनोपादानं चित्स्थाधाम्येन चेतनोपादानं च भविष्यतीत्याह॥ अचेतनानामिति ८७ ३७

ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचार्यैः परमात्मन एव तदभिधानादिति शं
कते ॥ तमःप्रधान इति । तमःप्रधानस्तमोगुणप्रधानमायोपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानक

तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां ॥ परः कारणतामेति भावनाज्ञानकर्मभिः ८८
इति वार्तिककारेण जडचेतनहेतुता ॥ परमात्मन एवोक्ता नेश्वरस्येति चेन्न तत् ८९ अ
न्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ९०

र्मभिः भावना संस्कारः ज्ञानं देवताध्यानादि कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः ८८ त्वंपदार्थ इव तत्
सदार्थेप्यधिष्ठानारोप्ययोरन्योन्याध्यासस्य विवक्षितत्वान्नैवमिति परिहरति ॥ ननतत् ८९ अन्योन्याध्यासमि

६६

चित्रदीप० ननु सुरेश्वराचार्यैः ईश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य स्वयं वक्तव्य इति कुतो वगम्यत इत्याशंक्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः पठति ॥ सत्यमिति ९१ भवत्वेषा श्रुतिरन्याः कथमन्यो ।

सत्यं ज्ञानमनंतं यद्ब्रह्म तस्मात्समुत्थिताः ॥ खं वाय्वग्निजलोर्व्योषधयन्नदेहा इति श्रुतिः ९१
आपातदृष्टितस्तत्र ब्रह्मणो भाति हेतुता ॥ हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्यते ९२

न्याध्यासावगतिरित्यत आह ॥ आपातेति ॥ तत्र तस्यां श्रुतौ सत्यादिलक्षणस्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वं जगत्कारणस्य मायाधीनचिदाभासस्य च सत्यत्वमापाततः प्रतीयमानमन्योन्याध्यासमंतरेण न घटत इति भावः ९२

घट्टित

एवमन्योन्याध्याससिद्धमीश्वरब्रह्मणोरेकत्वं पूर्वोदाहृतं घटदृष्टांतस्मारणेन द्रढयति अन्योन्येति ९३ भ्रांत्येकत्वापत्तौ दृष्टांतमभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टांतांतरं दर्शयति मेघाकाशेति ।।ऐक्यं पश्यंतीति न भेदमित्यर्थः ९४ कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह ।।उपक्रमादिभिरिति ।।उपक्रमोप

अन्योन्याध्यासरूपोसावन्नलिप्तः घटो यथा ।। घट्टितेनैकतामेति तद्वद्भ्रांत्यैकतांगतः ९३
मेघाकाशमहाकाशौ विविच्येते न पामरैः ।। तद्वद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः ९४ उप
क्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात् ।। असंगं ब्रह्ममायावी सृजत्येष महेश्वरः ९५

व संहारोभ्यासो पूर्वता ।। फलं ।। अर्थवादो ।। पपत्ती च ।। लिंगं तात्पर्यनिर्णय इत्यक्तैः षड्विधैर्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायावी सृष्टेत्यवगम्यत इति शेषः ९५ ।।श्रीरामचंद्रायनमः।। ।।श्रीरामायनम

चित्रदीप० ३९

श्रुतावुपक्रमोपसंहारैकरूप्यप्रदर्शनेनोक्तं ब्रह्मणो संगत्वं स्पष्टयति॥ सत्यंज्ञानमिति। अतो संगत्वनिर्णयो भ
वतीति शेषः ९६ मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति॥ मायीति॥ अस्मान्मायी
सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतिः ईश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं द

सत्यंज्ञानमनंतं चेत्युपक्रम्योपसंहृतं॥ यतो वाचो निवर्तंत इत्यसंगत्वनिर्णयः ९६ मायी
सृजति विश्वं सन्निरुद्धस्तत्र मायया॥ अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत् ९७ आ
नंदमय ईशोयं बहु स्यामित्यवैक्षत हिरण्यगर्भरूपोभूत्सुप्तिः स्वप्नो यथा भवेत् ९८ ॥

र्शयतीत्यर्थः ९७ एवमानंदमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रकारमाह॥ आनंदम ३९
य इति। ईक्षित्वा स हिरण्यगर्भरूपोभूदित्यन्वयः॥ तत्र दृष्टांतमाह॥ सुप्तिरिति ९८ ॥श्रीरामजी॥

तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण सृष्टिश्रवणात् इदं सर्वमसृजतेति युगपच्छ्रवणाच्चैकस्योपा
देयत्वं कस्य वा हेयत्वं इत्याकांक्षायां श्रुतियुक्त्युपेतत्वादुभयं ग्राह्यमित्याह ॥ क्रमेणेति ॥ एषा जगत्सृष्टिर्द्वि

क्रमेण युगपच्चैषा सृष्टिर्ज्ञेया यथाश्रुतिः ॥ द्विविधश्रुतिसद्भावात् द्विविधस्वप्नदर्शनात् ९९

धश्रुतिसद्भावात्क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना ॥ तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति ॥ लोके
क्रमयुक्तस्य वाऽक्रमयुक्तस्य च स्वप्नपदार्थजातस्य दर्शनादिति भावः ९९ ॥ श्रीरामचंद्राय नमः ॥

चित्रदीप० हिरण्यगर्भस्य स्वरूपं निरूपयति ॥ सूत्रात्मेति ॥ सूत्रात्मापदे सूत्रमिव जगदनुस्यूत आत्मा स्वरूपं यस्य स सू
८० क्ष्मदेहस्तस्याख्या यस्य स तथाविधः सर्वजीवघनात्मकः सर्वेषां जीवानां लिंगशरीरोपाधिकानां घनात्मकः

सूत्रात्मा सूक्ष्मदेहाख्यः सर्वजीवघनात्मकः ॥ सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान् २००

समष्टिस्वरूपः तत्र हेतुः ॥ सर्वाहंमानेति ॥ सर्वेषु व्यष्टिलिंगशरीरेषु अहमभिमानवत्त्वादिति भावः इच्छाज्ञा ८०
नक्रियाशक्तिमांश्च २०० यथा प्राणगतो देहः सुखं दुःखं न विंदति ॥ तथा चेत्प्राणयुक्तोऽपि स कैवल्याश्रयो भवे ७९

उषः

हिरण्यगर्भविरूछायां जगत्प्रतीतौ दृष्टांतमाह॥ मसृणइति॥ मसृणः कालः २०१ एवं लोकप्रसिद्धं दृष्टांतमभिधाय यथा धौतइति पूर्वोक्तश्लोके ऽभिहितं लांछितपटं दृष्टांतयति॥ सर्वेतइति॥ यथा घट्टितः पटो मषीमयै

मसृणैर्वा मदोषैर्वा मण्डोऽमंदेन मस्यपयं॥ लोकेऽभातियथा तद्वदस्पष्टं जगदीक्ष्यते २०१ सर्व
तोलांछितोमध्याय थास्याद्घृतः पटः॥ सूक्ष्माकारैस्तथेशस्य वपुः सर्वत्रलांछितं २ स
स्यंवा शाकजातंवा सर्वतोंकुरितं यथा॥ कोमलं तद्वदेवैष पेलवो जगदंकुरः ३

एकार विशेषैर्लांछितो भवति। तथा मायिन ईश्वरस्य वपुरपंचीकृतभूतकार्यैः लिंगशरीरैः लांछितमित्यर्थ २०२
बुध्यारोहायवैभवान्दृष्टांतांतरमाह॥ सस्यंवेति २०३ पेलवं विरलं तन्वित्यमरः॥ श्रीरामायनमः॥ ॥

चित्रदीप० एवंसूत्रात्मस्वरूपं विशदीकृत्य तस्यैवावस्थाभेदं पंचीकृतभूतकार्योपाधिकं विराजं दृष्टांतत्रयेण विशदयति ४१ आतपेति॥ सूर्योदयानंतरमातपेन प्रकाशितो लोक आतपाभानलोकः ४ तत्सद्भावे प्रमाणमाह॥ विश्वरूपे॥

आतपाभानलोको वा पटो वा वर्णपूरितः॥ सस्यं वा फलितं यद्वत्तथा स्पष्टवपुर्विराट् ४ विश्वरूपाध्याय एष उक्तः सूक्तेऽपि पौरुषे॥ धात्रादिस्तंबपर्यंतानेतस्यावयवान्विदुः ५

विश्वरूपाध्यायादेकादश्यमुपसुदितमित्याकांक्षायां ब्रह्मादिस्तंबपर्यंतं जगद्रूपमुदितमित्याह॥ धात्रादीति ५ एतावन्मात्रकृते किमायातमित्याशंक्यांतर्यामिप्रभृतिकुद्दालकादिपर्यंतं वस्तुजातं प्रत्येकमीश्वरत्वेन पूज्यतामित्याह॥ ईशेत्यादिना श्लोकत्रयेण ६ ४१

तंयथायथोपासतेतदेवभवतीति श्रुतिस्तत्तत्पूजानस्तत्तत्फलसद्भावेप्रमाणमित्याह॥ यथायथेति॥ ननुसर्वे

ईशास्सत्रविराट्वेधाविष्णुरुद्रेंद्रवह्नयः॥ विघ्नभैरवभैरालामारिकायक्षराक्षसाः ६ विप्र
क्षत्रियविट्शूद्रागवाश्वमृगपक्षिणः॥ अश्वत्थवटचूताद्याय वज्रीहितृणादयः ७ जल
पाषाणमृत्काष्ठवास्यकुद्दालकादयः॥ ईश्वराः सर्वएवैते पूजिताः फलदायिनः ८ यथा
यथोपासनेतंफलमायुस्तथातथा॥ फलोत्कर्षापकर्षौतुपूज्यपूजानुसारतः ९

सामीश्वरत्वेफलवैषम्यंकुतइत्याशंक्यपूज्यानामधिष्ठानानांपूजानामर्चादीनांचसात्त्विकादिभेदेनवैषम्यमित्या
ह॥ फलोत्कर्षेति ९

चित्रदी०प० सांसारिकत्वेफ सिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवतीत्याशंक्य ज्ञानव्यतिरेकेण न केनापि भवतीत्याह॥
४२ मुक्तिरिति॥ तत्र दृष्टांतमाह॥ स्वप्नबोधमिति॥ स्व जागरमंतरेण स्वनिद्राकल्पितस्वप्नो यथा न निवर्त्तते तत

मुक्तिस्तत्त्वब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा॥ स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा १०

थाब्रह्मतत्त्वज्ञानमंतरेण तद्ज्ञानकल्पितस्वसंसारो न निवर्त्तत इति भावः १० ॥ श्री रामाय नमः

४२

ननु द्वैतनिवृत्तिलक्षणायामुक्तेः स्वप्नदृष्टान्तेन न तत्त्वबोधसाध्यत्वाभिधानमनुपपन्नं निवर्त्यस्य द्वैतस्य स्वप्नतुल्य-
त्वाभावादित्याशंक्यान्यथा ग्रहणरूपत्वेन स्वप्नतुल्यत्वाभावादित्याशंक्यान्यथा ग्रहणरूपत्वेन स्वप्नतुल्यत्वम
स्यैव त्रयमेतत्सुषुप्तं स्वप्नं मायामात्रमिति श्रुत्याभिहितत्वान्नैवमित्याह ॥ अद्वितीयेति ॥ ईशजीवादिरूपेण व

अद्वितीये ब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत् ॥ ईशजीवादिरूपेण चेतनाचेतनात्मकं ॥ ११ ॥ आनं
दमयविज्ञानमयावीश्वरजीवकौ ॥ मायया कल्पितावेतौ ताभ्यां सर्वं प्रकल्पितं ॥ १२ ॥

र्तमानं चेतनाचेतनात्मकं यदखिलं जगदस्त्ययमद्वितीये ब्रह्मतत्त्वे स्वप्न इति योजना ॥ ११ ॥ नन्वीशजीवयोर्ब्रह्मा
भिन्नयोः कथं जगदंतःपातित्वमित्याशंक्य तयोर्मायाकल्पितत्वेन जगदंतःपातित्वमित्याह ॥ आनंदमयेति ॥ १२ ॥

तान्प्रांसर्वेमकल्पितमित्युक्तं तत्रकेनकियत्कल्पितमित्याकांक्षायामाह॥ ईक्षणादीति॥ सईक्षतलोकांनुसृजा इत्यादिश्रुत्याऽनयाद्वारप्रापघनेत्यंतयाश्रुत्याप्रतिपादितास्त्टिरीश्वरकर्तृकातस्पत्रयआवसथाइत्या

ईक्षणादिप्रवेशांतास्त्टिरीशेनकल्पिता॥जाग्रदादिविमोक्षांतःसंसारोजीवकल्पितः १३
अद्वितीयंब्रह्मतत्वमसंगंतंनजानते॥जीवेशयोर्मायिकयोर्वृथैवकलहंययुः १४

दिश्रुत्याऽनमेवपुरुषंब्रह्मततममपश्यदित्यंतयाप्रतिपादितःसंसारोजीवकर्तृक इत्यर्थः १३ ननुब्रह्मणएवपारमार्थिकत्वेवादिनांजीवेश्वरतत्वविषयाविप्रतिपत्तिःकुतइत्याशंक्याऽऽक्रांतिसिद्धतत्वज्ञानशून्यत्वादित्याह॥अद्वितीयमिति १४

85

जीवेश्वरविषयायावादिविप्रतिपत्तेरज्ञानमूलत्वेन तथाविधतत्त्वैर्न तैर्बोधनीया इत्याशंक्य वृथाश्रमत्वान्नेत्याह ॥
तात्त्विकेति १५ ईश्वरे जीवे च भ्रान्त्या विप्रतिपन्नान्वादिनो विभज्य दर्शयति तणाचेकादीति १६ कुतो भ्रान्तत्वं

तात्त्विकाः सदा तत्त्वनिष्ठाननुमोदामहे वयं ॥ अनुशोचाम एवास्माभ्रान्तैर्विवदामहे १५ तणा
चेकादियोगांता ईश्वरभ्रान्तिमाश्रिताः ॥ लोकायतादिसांख्यांता जीवविभ्रान्तिमाश्रिताः १६
अद्वितीयं ब्रह्मतत्त्वं न जानंति यदा तदा ॥ भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह वा सुखं १७

मि
तेषामित्यत आह ॥ अद्वितीयेति ॥ ततः किं तत्राह ॥ तेषामिति ॥ परिच्छिन्नपक्षप्रतिपादनाभिनिवेशेन वि
नविभ्रान्त्यभावान्नैहिकमपि सुखं तेषामित्याह ॥ क्वेह वा सुखमिति १७ ॥ श्रीरामायनमः ॥ ॥

चित्रदीप० ननु तेषां ब्रह्मविद्याभावेपीतरविद्यासंयुक्त उत्तमाधमभावो दृश्यते॥ अत उत्तमत्वसंयुक्तसुखं केषांचित्स्या-
४४ दित्याशंक्यातस्य मुमुक्षुभिरनादरणीयत्वं दृष्टांतेनाह उत्तमाधमेति॥ १८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वा-

उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते खलु १८
तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः॥ कार्या किंतु ब्रह्मतत्त्वं विचार्यं बुध्यतां च तत् १९

भावान्न मुमुक्षुभिस्तत्र मतिर्निवेशनीयेत्युपसंहरति तस्मादिति॥ तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ४४
ब्रह्मबोध एव कर्तव्य इत्याह॥ किंत्विति १९ वासुदेवं परित्यज्य योऽन्यं देवमुपासते तृषितो जाह्नवीतीरे कू-
पं खनति दुर्मतिः १

87

ता

ननुब्रह्मतत्त्वनिश्चयायतयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वेजीवेशवादयोरेव बुद्धिर्नेपरिसमाप्यतेत्याह ॥ पूर्वपक्षतयेति ॥ एवंतापूर्वपक्षतयातत्त्वनिर्णयहेतुत्वसंभवेननयोर्जीवेशवादयोरेवावशो विवेकज्ञानस्त्रोतोनिमज्जयेतियोजना २० ननुसांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेन

पूर्वपक्षतयातौचेत्तत्त्वनिश्चयहेतुतां ॥ प्राप्नुतोस्तुनिमज्जस्व तयोर्नैतावतावशः २० असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः ॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौताविति चेच्छृणु २१

भवद्भिरभ्युपादेयत्वाभतयोः पूर्वपक्षत्वमिति शंकते ॥ असंगचिदिति ॥ सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेपितयोर्वास्तवभेदस्यतैरंगीकारान्नायमस्मात्सिद्धांत इत्याहश्रृण्विति २१

चित्रदीप० तत्त्वंपदयोरुभावर्थाविरुद्धत्सिद्धांतत्वंनगतावितियोजना॥ ननुकूटस्थब्रह्मशब्दाभ्यांशुद्धेनत्वंपदार्थौभ
८५ वद्भिरपिभिन्नौनिरूपितावित्याशंक्याह॥ अद्वैतबोधनायैवेति॥ लोकप्रसिद्धभेदनिरासद्वारातदैक्यप्र
तिपादनायैवनोभेदेनानुदितौनतुतयोर्भेदःमतिपाद्यतइतिभावः २२ नहिंपदार्थशोधनंकिमर्थमि

नतत्वमोरुभावर्थाविरुद्धत्सिद्धांततांगतौ॥ अद्वैतबोधनायैवसाकक्षाकाचिदिष्यते॥२२
अनादिमाययाभ्रांताजीवेशौसुविलक्षणौ॥ मन्यंतेतत्पदासायुक्तेवलंशोधनंतयोः२३

त्यनआह॥ अनादीति॥ अत्रमायाशब्देनस्वाश्रयव्यामोहिकाऽविद्यालक्ष्यतेतयाविपरीतत्तानंभ्रांताः
कर्तृत्वादिमत्वंजीवस्यसर्वज्ञत्वादिगुणयोगित्वंचेश्वरस्यपारमार्थिकंमन्यंतेऽस्तत्रितस्यार्थमेवशोध
त

पदार्थशोधनमकारमेवं द्विः शोधितुस्तदुपादेयत्वेन पूर्वोक्तं दृष्टांतं स्मारयति ॥ अत एवेति ॥ यतः पदार्थशोध
नं कर्त्तव्यमत एवेत्यर्थः २४ पदार्थशोधनमकारमाह ॥ जलाभ्रेति ॥ ये जलाकाशाभ्रखे ते जलाभ्रोपाध्यधी

अत एवात्र दृष्टांतो योग्यः माकूसम्यगीरितः ॥ घटाकाशमहाकाशजलाकाशाभ्रखात्मकः २४
जलाभ्रोपाध्यधीने ते जलाकाशाभ्रखे तयोः ॥ आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ २५
एवमानंदविज्ञानमयौ मायाधियोर्वशौ ॥ तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले २६

नत्वादपारमार्थिके तयोराधारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाभ्रोपाधिनिरपेक्षाकाशमात्ररू
पावित्यर्थः २५ दार्ष्टांतिकमाह ॥ एवमिति २६

चित्रदी० ४६

ननु पदार्थद्वयशोधनकक्षोपयोगित्वेनापि सांख्ययोगमतद्वयमंगीकार्यमिति चेद् सत्यमिदमुच्यते इतरेषामपि शास्त्राणां तत्तत्कक्षोपयोगित्वेनास्माभिरभ्युपेयत्वादित्याह ॥ एतदिति २७ कुतस्तर्हि सांख्ययोगयोर्वेदांतविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरतटस्थलक्षणेंश इत्याह ॥

एतत्कक्षोपयोगेन सांख्ययोगौ मतौ यदि ॥ देहोऽन्नमयकक्षत्वादात्मत्वेनाभ्युपेयतां २७
आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयं ॥ त्यज्यते तैस्तदा सांख्ययोगवेदांतसंमतिः २८
जीवोऽसंगत्वमात्रेण कृतार्थ इति चेत्तदा ॥ स्रक्चंदनादिनित्यत्वमात्रेणापि कृतार्थता २९

आत्मभेद इति २८ ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धिः किमद्वैतबोधेनेत्याशंक्याद्वैतज्ञानमंतरेणासंग ४६
त्वादिकं न संभाव्यत इति अभिसंधितद्दिनिधायोत्तरमाह ॥ जीव इति २९ ॥श्रीरामायनमः॥ ॥

अभिसंधिमाविष्करोति॥ यथेति ३० असंभवमेवस्पष्टयति॥ अवश्यमिति॥ फलितमाह॥ कोस्येति ३१ संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेकनिवृत्तौ कुतः पुनः संगापत्तिरिति शंकते॥ अविवेकेति॥ एवं सत्यपसिद्धांतापात इति परिहरति॥ बलादिति॥ अयं भावः अविवेको नाम किं विवेकाभावः॥ किं

यथा स्रग्गादिनित्यत्वं दुःसंपादं तथात्मनः॥ असंगत्वमसंभाव्यं जानतोपि जगद्दृश्यतः ३०
अवश्यं प्रकृतिः संगं पुरेवापादयेत्तथा॥ नियच्छत्येतमाश्लेषि कोस्य मोक्षस्तथासति ३१
अविवेककृतः संगो नियमश्चेति चेत्तदा॥ बलादापतितो मायावादः सांख्यस्य दुर्मतेः ३२

वानदन्यः॥ उतन द्वितीयो विरोधि॥ नाद्यः॥ अभावमात्रस्य भावकार्यजनकत्वायोगात्॥ न द्वितीयः॥ विवेकादन्यस्य घटादेः संगहेतुत्वादर्शनात्॥ तृतीये तु न स्वभावरूपात्तानत्वमेवेति मायावादप्रसंग इति ३२

चित्रदीप० अद्वैतासुपगमेवं बंधमोक्षव्यवस्थानुपपत्तेरात्मभेदोंगीकर्त्तव्य इति चोदयति ॥ बंधमोक्षेति ॥ एकस्यैवा
४७ त्मनो मायया बंधमोक्षव्यवस्थोपपत्तेर्मैवमिति परिहरति ॥ नयत इति ३३ मायापि कथं व्यवस्थापयेदि

बंधमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां ॥ इति चेन्न यतो माया व्यवस्थापयितुं क्षमा
३३ दुर्घटं घटयामीति विरुद्धं किन्न पश्यसि ॥ वास्तवौ बंधमोक्षौ तु श्रुतिर्न सहते तरां

त्याशंक्य तस्या दुर्घटकारित्वस्वाभाव्यादित्याह ॥ दुर्घटमिति ॥ बंधस्याविद्यकत्वेपि मोक्षो वास्तवो भ्यु ४७
पेतव्य इत्याशंक्य श्रुतिविरोधान्नैवमित्याह ॥ वास्तवाविति ॥ न सहते नितरामतितरां नैव सहत इत्य
र्थः ॥ बंधमिव मोक्षमपि वास्तवं न सहत इति भावः ३४

मोक्षादेवास्तित्वत्वमिति येधिकांक्ष्यंतिंपठति॥ ननिरोध इति॥ निरोधोनाशः उत्पत्तिः देहसंबंधः बद्धः सुख
दुःखादिधर्मवान्॥ साधकः श्रवणाद्यनुष्ठाता॥ मुमुक्षुः साधनचतुष्टयसंपन्नः मुक्तः निवृत्ताविद्यः॥

ननिरोधोनचोत्पत्तिर्नबद्धोनचसाधकः॥ नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थता ३५
मायाख्यायाः कामधेनोर्वत्सौजीवेश्वरावुभौ यथेच्छं पिबतांद्वैतं तत्वंत्वद्वैतमेवहि ३६

इत्येनत्सर्वंवस्तुनोनास्तीत्यर्थः ३५ एवंजीवेश्वरादिभेदस्यमायामयत्वमुपपादितमुपसंहरति॥ माया

चित्रदीप० ६८

ननु जीवेश्वरयोर्मायिकत्वेन तद्भेदस्य मिथ्यात्वेऽपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोऽपि पारमार्थिकः स्या
दित्याशंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्नैवमिति परिहरति॥ कूटस्थेति॥ नाममात्राद्दृते अन्त
नावपि वस्तुतो भेदाभावे दृष्टान्तं पूर्वोक्तं स्मारयति॥ घटाकाशेति॥ ३७॥ एवं भेदस्य मिथ्यात्वसमर्थने किं फ

कूटस्थब्रह्मणोर्भेदो नाममात्रादृते न हि॥ घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् ३७
यदद्वैतं श्रुतं सृष्टेः प्राक्तदेवाद्य चोपरि॥ मुक्तावपि वृथा माया भ्रामयत्यखिलं जगत् ३८

लमित्यत आह॥ यदद्वैतमिति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति॥ श्रुतो यदद्वितीयं ब्रह्म प्रतिपा
दितं तदेव कालत्रयेऽप्यबाध्यत्वेन वास्तवं न भेद इति भावः॥ कुतस्तर्हि सर्वे भेदेऽभिनिवेशः क्रियत इत्यत
आह॥ वृथा मायेति॥ तत्त्वज्ञानरहितत्वादभिनिवेशं कुर्वन्तीति भावः ३८ ॥श्रीरामायनम॥ ॥

६८

95

ननु प्रपंचस्य मायामयत्वं तत्त्वस्याद्वितीयत्वं च येवर्णयंति तेपि संसरंतो दृश्यंते। तस्तत्त्वज्ञानेन किं प्रयोजनमिति शंकते॥ येवदंतीति॥ कर्मवशात्तेषांचिद्व्यवहारेसत्यपि पूर्ववदभिनिवेशाभावान्नैवमिति प॥

येवदंतीत्थमेतेपि भ्रांत्यैवंतेविषयात्रकिं॥ नयथापूर्वमेतेषामत्र भ्रांतेरदर्शनात् ३९ ऐ

स्ततः हिकामुष्मिकः सर्वः संसारो वास्तवो॥ नभातिनास्तिचाद्वैतमित्यज्ञानिविनिश्चयः ४०

रिहरति ३९ ज्ञानिनां भ्रांत्यभावं दर्शयितुं अज्ञानिनां निश्चयं तावदाह ऐहिकेति॥ इह लोके भवः ऐहिकः पुत्रकलत्रादिपोषणरूपः॥ अमुष्मिन् परलोके भवः आमुष्मिकः स्वर्गसुखाद्यनुभवरूपः ४०

तत्वज्ञविनिश्चयस्य ततो वैलक्षण्यं दर्शयति॥ ज्ञानिनामिति॥ अद्वैतं पारमार्थिकं भाति च संसारस्त्वपारमार्थिक इति
निश्चय इत्यर्थः॥ ततः किमित्याशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह॥ स्वस्वेति ४१ अद्वैतं भातीत्युक्तिः शा
स्त्रत एव नानुभवतो ऽतो न तन्निश्चय इति शंकते॥ नाद्वैतमिति॥ अनुभवागोचरत्वमसिद्धमिति परिहरति॥

ज्ञानिनां विपरीतोस्मान्निश्चयः सम्यगीक्ष्यते॥ स्वस्वनिश्चयतो वद्धो मुक्तोहं वेति मन्यते ४१ नाद्वैत
मपरोक्षं चेन्न चिद्रूपेण भासनात्॥ अशेषेण न भातं चेद्द्वैतं किं भासते खिलं ४२ ॥श्रीरामायन०

नचिद्रूपेणेति॥ घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूतस्फुरणरूपेण भानादित्यर्थः॥ ननु चिद्रूपत्वस्य भा ४९
नेपि तत्कार्त्स्न्येन न भानायत इति शंकते॥ साकल्येन भानाभावो द्वैतेपि समानमित्याह॥ द्वैतं किमिति ४२

एवं दोषसाम्यमभिधाय परिहारसाम्यमाह॥ दिङ्मात्रेणेति॥ दिङ्मात्रेणैकदेशेनद्वयोर्द्वैताद्वैतयोरित्यर्थः॥ एतावता कथं परिहारसाम्यमित्याशंक्याह॥ द्वैतसिद्धिवदिति॥ नैतावपक्षेतावतां एकदेशभनोतिसद्भावेन द्वैतसिद्धिवत् द्वैतनिश्चये काद्वैत सिद्धिरद्वैतनिश्चयोपिनेकिं न भवति किं भवस्येवेत्यर्थः ४३ पूर्ववादी प्रकारांतरेण अद्वैते

दिङ्मात्रेणविभानं नु द्वयोरपि समं खलु॥ द्वैतसिद्धिवद्द्वैतसिद्धिस्तेतावता न किं ४३ द्वैतेन हीन
मद्वैतं द्वैतज्ञानेकथं त्विदं॥ चिद्भानं त्वविरोधित्वाद् द्वैतस्यातोऽसमे उभे ४४

॥ सिद्धिं शंकते॥ द्वैतेनेति॥

अद्वैतं द्वैतरहितं तयोः परस्परविरोधात्॥ तथा सति द्वैतभानेतावदद्वैतं न संभवतीत्यर्थः ननु तेहि द्वैतस्यापि अद्वैतविरोधित्वादद्वैतमतिभासमाने द्वैतस्यासिद्धिरिति सोपंसमानमित्याशंक्याह॥ पूर्ववादी॥ चिद्भानं त्विति॥ भवन्मते चिद्रूपमतोनेरेव अद्वैतमतोनित्वात्तस्याश्च द्वैतविरोधित्वाभावान्नोभयोः साम्यमिति भावः ४४

चित्रदीप० प्रतीयमानस्याद्वैतस्य वास्तवत्वाभावात्प्रवास्तवाद्वैतविघातित्वमितिपरिहरति॥ सिद्धांती॥ एवमिति॥ प्रस
५० क्तप्रतिषेधेन्यत्राप्रसंगाच्छिष्यमाणेसंप्रत्ययःपरिशेषः ४५ परिशेषप्रकारमेवदर्शयति॥ अचिंत्येति॥ नचिं

एवंनिर्णितेस्फुटेद्वैतमस्यन्मायामयत्वतः॥ तेनवास्तवमद्वैतंपरिशेषाद्विभासते ४५ अचिंत्य
रचनारूपंमायैवसकलंजगत्॥ इतिनिश्चित्यवस्तुत्वमद्वैतेपरिशेष्यतां ४६ ॥श्री॥

त्याअचिंत्यरचनारूपंयस्यतत्तथाविधंसकलंजगत्मायैवमिथ्यैवेत्यनेनप्रकारेणानिर्वचनीयत्वान्मिथ्या ५०
त्वंद्वैतस्यनिश्चित्यवास्तवमद्वैतंपरिशेष्यतामित्यर्थ ४६ कृष्णायवासुदेवायदेवकीनंदनायच॥ नंदगोपकु
मारायगोविंदायनमोनमः

नन्वेवमद्वैतनिश्चये कृतेऽपि पुनः पुनर्द्वैतसत्यत्वपूर्ववासनया भानात्तस्याः शंकायां तन्निवृत्तये पुनः पुनर्मिथ्यात्वं विचार येदित्याह ॥ पुनर्द्वैतस्येति ॥ आवृत्तिरसकृदुपदेशादिति चतुर्थाध्यायव्यासेन श्रवणाद्यावर्तनस्य विहितत्वा

पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः ॥ परिशीलय को वात्र प्रयासस्तेन ते वद ४७ कियं
खे तं कालमिति चेत्खेदोऽयं द्वैत इष्यतां ॥ अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात् ४८

दिति भावः ॥ ४७ ॥ कियन्तं कालमित्थं विचारणीयमित्याशंक्य तत्र परोक्षविद्यायां सौ विचारोऽयं समाप्यत इति विचारकालावधेरुक्तत्वान्नाद्वैतविचारेऽयं खेदो युक्तः किंतु द्वैतप्रतिभास एव स युक्तस्तदाह कियन्तमिति ४८

चिद ५१

नन्वेवमद्वैतात्मतत्त्वापरोक्षज्ञानवतस्यपि मयि शुक्तिरूप्यासाधारणर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमा
त्मज्ञानस्यासिद्धमिति शंकते ॥ शुक्तिरूप्यासादय इति ॥ किंमच्छब्दवाच्ये हंकारे दृश्यं नेउतमच्छब्दोपलक्षितेचि
दात्मनीति विकल्प्य आद्यमंगीकरोति ॥ मच्छब्दवाच्य इति ॥ नद्वितीयः ॥ तस्यासंगत्वादविषयत्वाच्चेति व

शुक्तिरूप्यासादयो दृष्टा यथापूर्वं मयीति चेत् ॥ मच्छब्दवाच्ये हंकारे दृश्यतां नेति कोवदेत् ४९
चिद्रूपेपि मसज्येरं स्तादात्म्याध्यासतो यदि ॥ माध्यासं कुरु किंतु त्वं विवेकं कुरु सर्वदा ५०

क्तिरेव द्रष्टव्यं ४९ वस्तुतस्तत्त्वात्मनीस्यभावेपि भ्रांत्या तनत्र संक्तिः स्यादिति शंकते ॥ चिद्रूपेपीति ॥ एवंतर्ह्यनर्थ ५१
हेतोरध्यासस्य निरंतरं येसदा विवेकः क्रियतामित्याह ॥ माध्यासमिति ५० ॥ श्रीरामायनम ॥

अनादिवासनावशात्पुनः पुनरध्यासागमनेतन्निवृत्तये विवेकएवआवर्त्तनीयोनोपायांतरमित्याह॥ स्म
टितांति ५१ ननुविचारेणाद्वैतस्यमायामयत्वंयुक्त्यैव सिध्यति नानुभवत इत्याशंक्याविंसरचनात्वलक्ष

ष्टादित्यध्यासश्चायातिदृढवासनयेतिचेत्॥आवर्त्त्येद्विवेकंचदृढंवासयितुंसदा ५१ विवे
केद्वैतमिथ्यात्वंयुक्त्यैवेतिनभण्यतां॥अचिंसरचनात्वस्यातुभूतिर्हिस्वसाक्षिकी ५२

णमिथ्यात्वानुभवस्यस्वसाक्षिकत्वान्नैवमितिपरिहरतिविवेकइति ५२ श्रीरामायनमः॥ ॥

चित्त्रदी० नच चित्संसरचनात्वं मिथ्यापदार्थलक्षणमुक्तं चिदात्मन्यतिव्याप्तमिति शंकते॥ चिदपीति॥ प्रागभावयुतत्वे सति
५२ सचित्संसरचनात्वं मिथ्यात्वलक्षणमिति विवक्षुः चित्संसरचनात्वं आत्मनोंगी करोति॥ तर्ह्यस्त्विति॥ एवमंगी

चिदप्यचित्संसरचनायदि तर्ह्यस्तु नोवयं॥ चितिसु चित्संसरचनां त्वमो नित्यसत्त्वकारणात् ५३

कारेऽपसिद्धांतइत्याशंकां परिहरति॥ नोवयमिति॥ तत्र हेतुमाह॥ नित्यसत्त्वेति॥ वयं चितिसु चित्संसरचनां नैं ५२
त्वमंइति योजना ५३

चितेर्नित्यत्वं कुत इत्याशंक्य प्रागभावानुभवाभावादित्याह ॥ प्रागभाव इति ॥ यतश्चितेः प्रागभावो नानुभूतस्ततो
नित्येति योजना ॥ इदमत्राकूतं ॥ चितेः प्रागभावोस्तीति वदन्प्रष्टव्यः चित्प्रागभावः किं चितानुभूयते उता
न्येन ॥ नान्येन तस्य जडत्वेन अनुभवितृत्वानुपपत्तेः ॥ चितानुभूयत इत्यपि पक्षे किं चिदंतरेणोत स्वेनैव ।

प्रागभावो नानुभूतश्चितेर्नित्या ततश्चितिः ॥ द्वैतस्य प्रागभावस्तु चैतन्येनानुभूयते ५४

नाद्यः अद्वैतत्वाद्चिदंतरस्यैवाभावात् ॥ न स्वोकारेपि चितिमति योगिकस्याभावस्य चिद्गतरूपांतरेण ग्रहीतुमश
क्यत्वात् तस्य अपि ग्रत्यमाणत्वे घटादिवद्चित्वापत्तेः ॥ नापि द्वितीयः ॥ स्वाभावस्य स्वेन ग्रहीतुमशक्यत्वा
दिति ॥ ननु द्वैतस्य प्रमात्रादिभेदरूपत्वात्तदभावस्य चैतन्येनैवानुभवितुमशक्यत्वात्तदनुभवितृत्वं ॥ ॥श्री॥ ॥

चित्रदी° ५० तराभावाश्चैतन्यवेदवेद्वैतस्यापि निसत्वापत्तिरित्याशंक्य अनुभवित्रंतराभावोऽसिद्ध इति परिहरति ॥ द्वैतस्ये

५३ ति ॥ जाग्रदादिद्वैताभावस्य सुषुप्तौ साक्षिणाऽनुभूयमानत्वान्नमसः साक्षि सर्वस्य साक्षी नित्यं तेश्चेति भावः

५४ एवं प्रागभावयुतत्वे सत्यचिंत्यरचनात्वस्य मिथ्यात्वलक्षणस्य सद्भावाद्द्वैतमिथ्यात्वं सिद्धमित्याह ॥ प्रागभा

प्रागभावयुतं द्वैतं रच्यते हि घटादिवत् ॥ तथापि रचनाऽचिंत्या मिथ्यातेनेंद्रजालवत् ५५

वेति ॥ प्रागभावयुतमिति हेतुगर्भितं विशेषणं द्वैतं प्रागभावयुतत्वाद्घटादिवद्रच्यते हि तथापि रच्यमानत्वेपि ५३

न स्यद्वैतस्य रचनाऽचिंत्या तेन रच्यमानत्वे सत्यचिंत्यरचनात्वेनेंद्रजालवदैंद्रजालिकप्रासादवन्मिथ्येत्यर्थः ५५

चितिस्तावत्स्वप्रकाशत्वेन नित्यापरोक्षावभासते चिद्व्यतिरिक्तस्य च मिथ्यात्वं तथैव चितानुभूयत इति दर्शितं॥ ए
वं च सत्यद्वैतस्यापरोक्षं नास्तीति वदतो व्याघातश्च स्यादित्याह॥ चित्प्रत्यक्षेति॥ चिद्रूपेण भासनादित्यभिप्रेत
सुक्तिसमुच्चयार्थश्च शब्दः॥ अद्वैतमपरोक्षं नेत्येतत्कथं न व्याहतं चेति योजना ५६ एवं वेदांतार्थज्ञान नाम

चित्प्रत्यक्षा ततोऽन्यस्य मिथ्यात्वं चानुभूयते॥ नाद्वैतमपरोक्षं चेत्येतन्न व्याहतं कथं ५६
इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यतां॥ चार्वाकादेः प्रबुद्धस्याप्यात्मादेहः कुतो वद ५७

पिपुरुषाणां केषांचिदत्र विश्वासः कुतो न जायत इति पृच्छति इत्थमिति सम्यक् विचारस्यान्यत्वादिति विवक्षुः प्र
तिबंदी ग्रह्णाति॥ चार्वाकादेरिति॥ आदिशब्देन पामरा गृह्यंते॥ प्रबुद्धस्योहापोहकुशलस्य ५७

चित्रदी॰ प॰ प्रतिबंदीमोचनं शंकते॥ सम्यगिति॥ साम्येन समाधत्ते॥ नथेति॥ धीदोषादित्यनुषज्यते॥ तुशब्द एवशब्दार्थः॥

५४ ५८ इत्थं तत्त्वं विचार्यन जन्यतत्त्वज्ञानफलं विचारयितुं तत्र श्रुति पादिकां श्रुतिं पठति॥ यदेति॥ अथ प्रसंगतो

सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा॥ असंतुष्टस्तु शास्त्रार्थं न त्वैक्षत विशेषतः ५८

यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रिताः॥ इति श्रौतं फलं दृष्टं नेति चेद्दृष्ट मेव तत् ५९

भवसत्र वृत्त समश्रुत इत्यस्य मंत्रस्यानन्तरार्थं अस्य मुमुक्षोर्हृदि श्रिताः ये कामास्ता दात्म्याध्यासमूला इच्छादयः ५४

संति ते सर्वे यदा यस्मिन्काले प्रमुच्यंते तत्त्वज्ञानेनाध्यासनिवृत्तौ निवर्तंते अथ तदानीमेव मर्त्यः पूर्वं देहता

दात्म्याध्यासेन मरणशीलः पुरुषः॥

मनः अध्यासाभावेन तद्गृहितो भवति ॥ तत्र हेतुमाह ॥ अत्र ब्रह्म समश्नुत इति ॥ अत्रास्मिन्नेव देहे ब्रह्मसत्यादि
लक्षणं समश्नुते सम्यग्व्याप्नोतीत्यस्याः श्रुतेरर्थः ॥ श्रुत्यामतिपादितं फलं कामनिवृत्त्यादिलक्षणं नानुभवसिद्धं
किंतु शाब्दमेवेति शंकते ॥ इति श्रौतमिति ॥ समनंतरश्रुतिवाक्यतात्पर्यपर्यालोचनया तस्य दृष्टत्वं सिध्यती

यदा सर्वे प्रभिद्यंते हृदयग्रंथयः स्थिति ॥ कामा ग्रंथिस्वरूपेण व्याख्याता वाक्यशेषतः ६०

त्यभिप्रायेण परिहरति ॥ दृष्टमेव तदिति ५८ तस्य दृष्टत्वस्पष्टीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह ॥ यदा सर्वे इ
ति अनेन वाक्यशेषेण कामप्रमोक्षस्य ग्रंथिभेदत्वेन व्याख्याततात्वात् ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादा
त्म्याध्यासनिवृत्तिलक्षणस्यानुभवसिद्धत्वान्नाप्रत्यक्षेति भावः ॥ वाक्यशेषत इत्यनेन वाक्येनेत्यर्थः ६०

चित्रदी प०
५५

ननु लोके कामशब्देन इछाभेद एवोच्यते अतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्य अध्यासमूलस्यैवेछादि
विशेषस्य कामशब्दवाच्यत्वं न इछामात्रस्येत्याह॥ अहंकारेति ६१ नन्वध्यासमूलस्यैव कामस्य त्याज्यत्वे सतीत
रोऽभ्युपेतव्यः स्यादित्याशंक्याबाधकत्वादभ्युपेयत एवेत्याह अपवेश्येति॥ अहंकारे चिदात्मानमपवेश्यता

अहंकारचिदात्मानावेकीकृत्याविवेकतः॥ इदं मेस्यादिदं मेस्यादितीछा कामशब्दिता ६१
अपवेश्य चिदात्मानं पृथक्पश्यन्नहंकृतिं॥ इछंस्तु कोटिवस्तूनि न बाधो ग्रंथिभेदतः ६२
ग्रंथिभेदेपि संभाव्या इछा प्रारब्धदोषतः॥ बुध्वापि पापबाहुल्यादसंतोषो यथा तव ६३

दात्म्याध्यासेनानंतर्भाव्येत्यर्थः ६२ नन्वध्यासाभावे कामानामनुदय एव स्यादित्याशंक्य प्रारब्धकर्मवशात्तेषा
मुत्पत्तिः संभविष्यतीत्याह॥ ग्रंथिभेदेपीति॥ तत्र दृष्टांतमाह॥ बुध्वापीति ६३ ॥श्री॥ ॥

५५

105

अध्यासाभावेऽहंकारगतेच्छादेरबाधकत्वं दृष्टांतद्वयप्रदर्शनेन विशदयति॥ अहंकारेति॥ यथा देहगतव्याध्या
दिभिरहंकारसाक्षिणो बाधो नास्ति देहसंबंधरहितत्वात् यथा वृक्षादिगतैर्जन्मादिभिरेवमध्यासनिवृत्ता

अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा॥ वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भवेत् ६४
ग्रंथिभेदात्पुरा प्येवमिति चेत्तन्न विस्मर॥ अयमेव ग्रंथिभेदस्तव तेन कृती भवान् ६५

वहंकारगतेच्छादिभिरपीति भावः ६४ चिदात्मनोऽसंगत्वस्यैकरूपत्वात्पूर्वमपि कामादिबाधो नास्तीति शंक
ते॥ ग्रंथिभेदादिति॥ एवंविधबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं बोधमस्मदनुकूलमि
त्याह॥ तन्न विस्मरेति ६५

चित्रदी॰प॰ एवंविधज्ञानाभाव एव ग्रंथिरित्याह ॥ नैवमिति ॥ ननु ज्ञानिनोपीछाभ्युपगमे ज्ञाज्ञानिनोः कुतो वैलक्षण्यमि
५६ त्याशंक्य ग्रंथिभेदाभेदातिरेकेण न कुतोपीत्याह ॥ ग्रंथितद्भेदेति ॥ ६६ ॥ कारणांतराभावमेव विशदयति ॥ प्र

नैवं जानंति मूढाश्चेत्सोयं ग्रंथिर्न चापरः ॥ ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ६६ प्रवृत्तौ वा
निवृत्तौ वा देहेंद्रियमनोधियां ॥ न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः ६७ ब्रात्यश्रोत्रि
ययोर्वेदपाठापाठकृता भिदा ॥ नाहारादावस्ति भेदः सोयं न्यायोत्र योज्यतां ६८ न द्वेष्टि सं
प्रवृत्तानि न निवृत्तानि कांक्षति ॥ उदासीनवदासीन इति ग्रंथिभिदोच्यते ७०

॥वृत्ताविति ६७ उक्ता
र्थे दृष्टांतमाह ब्रात्येति ६८ ज्ञानिनो ग्रंथिभिन्नत्वे गीतावाक्यं प्रमाणयति ॥ न द्वेष्टीति ॥ संप्रवृत्तानि प्राप्ता ५६
नि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षति उदासीनवद्वर्तत इत्यर्थः ॥ ग्रंथिभिदा ग्रंथिभेदः

१११

इदं वाक्यमौदासिन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते ॥ औदासिन्यमिति ॥ विधिपरत्वेव छब्दो व्यर्थः स्यादिति परिहरति ॥ व छब्देति ॥ ज्ञानि देहादेरकार्यक्षमत्वादप्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति ॥ न

औदासिन्यं विधेयं चेद्वछब्दव्यर्थता तदा ॥ न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ७०
तत्वबोधं क्षयं व्याधिं मन्यंते ये महाधियः ॥ तेषां प्रज्ञाति विशदा किं तेषां दुःशकं वद ७१

शक्ता इति ७० भवतु को दोषस्तत्राह ॥ तत्वबोधमिति दुःशकमसाध्यमित्यर्थः ७१ ॥ श्रीरामचंद्राय नमः

112

चित्रदी० प० ५७

नन्वस्थाने परिहासोऽयं ज्ञातिनां भवत्स्वभावस्य पुराणसिद्धत्वादिति शंकते भरतादेरिति श्रुतिमजानानाः श्रोतारः सन्तीति परिहरति ॥ जक्षन्निति ॥ जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा वयस्यैर्वा नोपजनं स्मरन्निदं शरीरमिति ॥ श्रोतं वाक्यं नाश्रौषीरित्यर्थः ॥ जक्षन् भक्षन् जक्ष भक्षहसनयोरिति धातुः क्रीडन् स्वेच्छया विहरन्

भरतादेरप्रवृत्तिः पुराणोक्तेति चेन्न तत् ॥ जक्षन् क्रीडन् रतिं विन्दन्नित्यश्रौषीर्न किं श्रुतिं ७२

नत्याहारादिसंत्यज्य भरतादिः स्थितः क्वचित् ॥ काष्ठपाषाणवत्किन्तु संभवीनात्र दास्यते ७३

रन्रममाणः स्त्र्यादिभिः नोपजनं स्मरन्निदं शरीरं इत्युपजनं जनानां समीपे वर्तमानमिदं स्वं शरीरं न स्मरन्नानुसंदधान इत्यर्थः ७२ श्लोके रतिं विन्दन्निति श्रोतस्य रममाण इति पदस्य व्याख्यानं ॥ ननु तर्हि पुराणस्य का गतिरित्याशंक्य पुराणमप्योदासीन्यबोधनपरं न भवत्स्वभावपरमित्यभिप्रेत्याह ॥ नत्याहारादिति ७३ ५७

संगोपि कुतस्त्यज्यत इत्यत आह ॥ संगीहीति ७४ ननु तर्हि मानससंगस्यैवत्याज्यत्वेंऽतःसंगशून्यानां वहिर्व्यव
हरतामस्तात्वादिकं जनैः कथमुच्यत इत्याशंक्य शास्त्रतात्पर्यज्ञानशून्यत्वादित्याह ॥ अज्ञात्वेति ॥ अतो मूढ

संगी हि बाध्यते लोके निःसंगः सुखमश्नुते ॥ तेन संगः परित्याज्यः सर्वदा सुखमिच्छता ७४
अज्ञात्वा शास्त्रहृदयं मूढो वदति अन्यथान्यथा ॥ मूर्खाणां निर्णयस्त्वास्तामस्मत्सिद्धांत उच्यते ७५
वैराग्यबोधौ परमौ सहायौ स्तः परस्परं ॥ प्रायेण सह वर्त्तेते वियुज्येते क्वचित् क्वचित् ७६

व्यवहारे नात्र विचारणीय इत्याह ॥ मूर्खाणामिति ॥ तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृदयमित्याह ॥ अस्म
त्सिद्धांत इति ७५ कोसावित्यत आह ॥ वैराग्येति ७६

चित्रदीप० वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनाद्भेदाशंकायां तद्धेत्वादीनां भेदाद्भेदोऽवगन्तव्य इत्याह॥ हेतुस्वरूपे

५८ ति॥७७ तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति॥ दोषदृष्टिरिति ७८ इदानीं तत्त्वबोधस्य कारणानि दर्शयति॥ श्रव

हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः॥ यथावदवगन्तव्यः शास्त्रार्थं प्रविविक्षता ७७ दोषदृ
ष्टिर्जिहासा च पुनर्भोगेष्वदीनता॥ असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी ७८ श्रवणादि
त्रयं तद्वत्तत्त्वमिथ्याविवेचनं॥ पुनर्ग्रन्थेरनुदयो बोधस्यैते त्रयो मताः ७९

॥णादीति॥ आदिशब्देन म
नननिदिध्यासने गृह्येते। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिवि
धानात् श्रवणादेर्ज्ञानहेतुत्वं॥ तत्त्वमिथ्याविवेचनं कूटस्थस्याहंकारादेश्च भेदज्ञानं ग्रन्थेरनुदयोऽन्योन्याध्यासानु

115

उपरतेस्तानिदर्शयति॥ यमादिरिति॥ आदिशब्देन नियमादयो गृह्यंते॥ धीनिरोध श्चित्तवृत्तिनिरोधलक्षणो योग ८० त्रिमेतेषां समस्ताधान्यस्तुतने त्साशंक्याह॥ तत्वबोध इति॥ तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यते

यमादिर्धीनिरोधश्च स्ववृत्तारस्य संक्षयः॥ सुदृढत्वात्साधनो परतेरित्यसंकर इरितः ८० तत्वबोध
धर्मधानः स्यात्साक्षान्मोक्षमदत्वतः॥ तौ धीपकारिणावेतौ वैराग्योपरमावुभौ ८१

धीनायेति श्रुतेरित्यर्थः॥ इतरयोस्तूपकारित्वं ज्ञात्मणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिग छेत् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिभ्यामवगम्यते ८१
वालानंप

प्रायेण सत्प्रवर्त्तते विमुच्यंते क्वचित्क्वचिदित्युक्तं॥ तत्र कारणमाह॥ त्र्योपीति॥ अनेकजन्मार्जितपुण्यपुंजपरिपाकेन त्र्याणां॥ सद्भावो भवति॥ अन्यथा तु मतिबंधकपापानुसारेण पुरुषविशेषे कालविशेषे च कस्यचित् प्रतिबंधो भवतीति भावः ८२ तत्रापितत्त्वज्ञानमतिबंधे मोक्षो नास्तीत्याह॥ वैराग्येति॥ तर्हि वैराग्यादिसंपादनं निः

त्र्योप्यत्संतपश्चाश्चेन्महतस्तपसः फलं॥ दुरितेन क्वचित्किंचित्कदाचित्प्रतिबध्यते ८२ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते॥ यस्य तस्य न मोक्षोस्ति पुण्यलोकस्तपोबलात् ८३

फलमित्याशंक्य प्राप्य पुण्यकृतान्लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टोभिजायते इति भगवद्वचनात् पुण्यलोकप्राप्तिर्भवतीत्याह॥ पुण्यलोकस्तपोबलादिति ८३ ॥श्रीरामायनमः॥

117

वैराग्ये परसोस्तत्प्रतिबंधे जीवन्मुक्तिसुखं न सिध्यतीत्याह ॥ पूर्णे बोध इति ८४ इदानीं वैराग्यादीनामवधिं दर्शयति ॥ ब्रह्मलोकेति सुप्तिवदिति ८५ अवांतरतारतम्यं स्वस्वबुध्या निश्चेयमित्याह ॥ दिशेति ८६ ननु तत्त्वबोधवतामपि रा

पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ॥ मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ८४ ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते ८५ सुप्तिवद्विस्मृतिः सीमा भवेदुपरमस्य हि ॥ दिशानया विनिश्चेयं तारतम्यमवांतरं ८६ आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा ॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पंडितैः ८७ ॥ श्रीरामचंद्रायनम ॥

गादिमत्त्वं नवैयर्थ्यापत्तं भान ज्ञानस्यापि मुक्तिहेतुत्वं न निश्चेतुं शक्यं इत्याशंक्य रागद्वेषाद्यादिवदारब्धकर्म फलत्वा मुक्तिप्रतिबंधकत्वमसिद्धमतो न शास्त्रार्थे विमतिपत्तव्यमित्याह ॥ आरब्धकर्मनानात्वादिति ८७

चित्रदीप०
६०

क्षिं तर्हि मतिपतल्ममित्यत आह ॥ स्वस्वेति ॥ सर्वेषां ब्रह्माहमस्मीति ज्ञानमेकाकारं निरवद्यब्रह्मरूपेणावस्थानं च स
मानमिति भावः २८८ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति ॥ जगदिति ॥ २८९ ॥ ग्रंथाभ्यासफलमाह ॥ चित्रदी

स्वस्वकर्मानुसारेण वर्तंतां ते यथा तथा ॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः २८८ ज
गच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं ॥ मायया तदुपेक्ष्यैव चैतन्ये परिशेष्यतां २८९ चित्रदीप
मिमं नित्यं येनुसंदधते बुधाः ॥ पश्यंतोपि जगच्चित्रं तेन मुह्यंति पूर्ववत् २९० इति चित्रदीपः ॥

पमिममिति ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यशिष्येण रामकृष्णाख्य
विदुषा विरचितं तात्पर्यबोधिनीनामकं चित्रदीपव्याख्यानं समाप्तं ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

६०

[OrderDescription]
,CREATED=16.10.20 17:20
,TRANSFERRED=2020/10/16 at 17:33:20
,PAGES=119
,TYPE=STD
,NAME=S0004068
,Book Name=M-1430-TRIPTIDEEP
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,